# कारण्डव्यूहः

॥ महायान-सूत्रम् ॥

## ॥ बौद्धशास्त्रम् ॥

महासत्त्वार्य्यावलोकितेश्वरबोधिसत्त्वस्य प्रभाववर्णनामुखेन
श्रीमद्-भगवन्नामक-तथागत-कथितो धर्म-ग्रन्थः।

—:·०·:—

"प्रत्नकम्रनन्दिनी"-सम्पादक-श्रीसत्यव्रत-सामश्रमि-भट्टाचार्य्येण
बहुतरयत्नतः सम्पाद्य नागराक्षरैः प्रकाशितः।

—०:·:०—


श्रीरामपुर—माहेशः

**सत्ययन्त्रम्**

प्रिण्टार श्रीखगपति सरकारः।

शकाब्दाः १७९४

## ॥ कारण्डव्यूहः ॥

——:-०-:——

बौद्धानां सूत्र-ग्रन्थ एषः। अस्ति तेषां धर्मग्रन्थस्त्रिविधः, सूत्र-विनयाऽभिधर्मेति। सूत्रग्रन्थाश्च नव—प्रज्ञापारमिता, कारण्डव्यूहः, सद्धर्मपुण्डरीकः, लङ्कावतारः, दशभूमीश्वरः, समाधिराजः, ललितविस्तरः, सुवर्णप्रभासः, तथागतगुह्यकश्च। प्रज्ञापारमिताच द्विविधा—बृहत् प्रज्ञापारमिता लक्षश्लोकात्मिका नेपालादि-देश-व्यवहृता, द्वितीया तु अष्टसहस्रश्लोकात्मिका सैव अष्टसाहस्रिकेत्युपरच्यते, व्यवह्रियते च सा लङ्का-द्वीपादौ। कारण्डव्यूहोऽयं गण्डव्यूह नामतोऽपि ख्यायते।

बौद्धानां मत-प्रकाशकाः सन्ति बहवो ग्रन्थाः, तेषाञ्च वैदिक-समकालत्व मनेकानाम्, अद्याप्यध्ययनाध्यापनानुक्रमेण व्यवहृत्या जाग्रति च ते चीन-तिब्बत-कोचीन भूटान-नेपाल-लङ्कादौ; अस्मद्देशे तु अभिज्ञ-बौद्धाना मत्यल्पतया दस्माकं तदनुसन्धान-विरहात् तदक्षरस्य वैचित्र्याच्च तेषां नामग्रहोऽपि विचित्रः। योऽप्यस्ति माधवाचार्य-कृतौ बौद्धदर्शन-संग्रहः, तस्यातिसार-मात्रत्वान्नापि सुग्रहता न च मतस्तृप्तिकारिता परं स एवात्र बहु मन्यते परमत दिदृक्षुभि र्विचक्षणैः।

मया तु प्रत्न-ग्रन्थान् मृग्यमाणेन एसियाटिक् सभाया अध्यक्ष-कल्पः श्रीराजेन्द्रलाल-मित्र-मित्रस्य साहाय्येन बौद्धानामपि बहवो ग्रन्थाः समवापि। मुद्रितस्यास्यादर्शपुस्तकस्यैकस्य लेख-

यित् रावासः विजय-राज्यान्तर्गत भक्तपुर-नाम-नगर-मध्यस्थ-पौराख्य-चत्वरात् पूर्व्वदिग्विभागः। स च महाराजाधिराज-परमेश्वर-परम-भट्टारक-श्रीश्री-जगत्प्रकाश-मल्ल-देव-पुत्रष्ठाकुरः शाक्यभिक्षुः धर्मात्मा श्रीदेवसिंहः! तस्य भार्या श्रीमयना लक्ष्मी, द्वितीयनारी जयनु लक्ष्मीः, तृतीयकान्ता अयना लक्ष्मीः। तस्य प्रथमपुत्रः शिल्पवित् शाक्यभिक्षुः श्रीकुशल देवः। तस्य पत्नी लषती लक्ष्मीः। द्वितीयात्मजः शाक्यभिक्षुः श्रीदेवमुनिः। तृतीयपुत्रः शाक्यवंशो जयकल्याणः। कुशलदेवस्य प्रथम-दुहिता प्रतिसरा।

एतद्ग्रन्थ-विवरणन्तु ग्रन्थपाठत एव ज्ञेयं प्रथमतो विदिते न ह्यनास्वादित-रस-लाभस्य सम्भावना। बौद्धानां ग्रन्थादीना माचरणानां वा विशेष-जिज्ञासुभि र्मदनुग्राहकं पुस्तकस्र-नन्दिन्या ग्राहकं श्रीश्रीयास्काडो-सुभाति-नामानं बौद्धाना-सुप देशकं लङ्काद्वोप-वासिनं पृष्टव्यम् पत्रादितः।

अत्रानेकत्राशुद्ध मसंलग्न-पाठश्च समीचीत दुर्बोधतापि प्रतिभायात्, परं वेदवत् विदित्वातिक्राम्यं तत् समस्तम्, अस्ति हि बौद्धानामपि वैदिकवत् व्याकरण-कोषादि-पार्थक्यम्, शोधन-दोषस्तु लक्ष्यतैव लक्षकाणां स्फुटमिति शम्।

सामश्रमीतुरपनामकः श्रीसत्यव्रतशर्मा।



पुरोऽवलोक्य। सैवेयं मृगाङ्कावली।

विदूषकः। भो मिअंकावलि ज्जेव एसा णहु एक्कचन्दस्स एत्तिओ कंतिवित्थारो *।

राजा। ततः कदलीलतान्तरिताविव शृणुव स्तावदस्या विस्र-म्भजल्पितानि। आतृप्ति पिबेतां श्रवसो रसायनम्। तथा कुरुतः।

ततः प्रविशति मृगाङ्कावली विचक्षणा च।

मृगाङ्कावली। अनुध्याननाटितकेन तदेव (१) पठति।

राजा। सखेदम्। अहो मदनमन्त्राक्षराणि सुभाषित वचनान्यस्याः।

विदूषकः। अहं उण जाणे निसिदाओ हदमअणस्स हत्थभल्लीओ †।

राजा। कण्ठे मौक्तिकमालिकाः स्तनतटे कार्पूरमच्छं रजः
सान्द्रं चन्दनमङ्गके वलयिताः पाणौ मृणालीलताः।
तन्वी नक्तमियं चकास्ति तनुनी चीनांशुके बिभ्रती
शीतांशोरधिदेवतेव गलिता व्योमाग्रमारोहतः (२) ॥ १६ ॥

*भोः मृगाङ्कावल्येवैषा न खलु एकचन्द्रस्य एतावान् कान्तिविस्तारः।

† अहं पुनर्जाने निषिता हतमदनस्य हस्तभल्ल्यः।

'विधुरितं'—आननं—येषां तथाभूतानां कामातुराणां जीवितस्य—जीवनस्य त्राणहेतोः—परित्राणार्थं। हरिणलक्ष्मा – मृगाङ्कावली येन अम्भःपानेन तेजोदरिद्रः – तेजसाविहीनः भवतीति परिदृश्यते ॥

(१)—नेपथ्ये रद्दा अ मए इत्युपक्रम्य (४७पृ०) चन्द्रं चन्दन कर्दमेत्यादि।

(२)—इयं तन्वी व्योमाग्र मारोहतः शीतांशोः चन्द्रस्य अधि अधिष्ठात्री देवता गलिता भूमौ च्युता इव चकास्ति शोभते। कीदृशी इयम्?—कण्ठे मौक्तिकानां अल्पामालाः बिभ्रती धृतवती, स्तनतटे अच्छं स्वच्छं कार्पूरं रजः बिभ्रती, अङ्गके अङ्गे सान्द्रं घनं चन्दनं बिभ्रती, वलयिता वलयाइव कृताः मृणालीलताः पाणौ बिभ्रती, तनुनी सूक्ष्मे चीनांशुके चीनदेशीये अंशुके वसने बिभ्रती।

Yale University Library.

# প্রত্ন-কম্র-নন্দিনী

সপ্তটীকষাড়্বিদ্দর্শনাদিকামিনী

প্রত্নকম্রনন্দিনী।

OR

# THE HINDU COMMENTATOR

**A MONTHLY SANSKRIT**

*JOURNAL.*


| | | |
|---|---|---|
| Vol. V | ৫মভাগঃ। ১মসঙ্খ্যা | ৫ম ভাগ |
| No. 1 | ১৩৮৪ বৈশাখ | ১ম সঙ্খ্যা |


ইহত্যানাং যথাক্রমং সূচী—


পঞ্চমভাগের উপক্রম।
আরণ্য-সংহিতা।
পুর্বমস্য-দর্শনম্।
মন্ত্র-ব্রাহ্মণম্।
চন্দ্রশেখর-চম্পূঃ।
সাংখ্য-দর্শন।
কারণ্ডব্যূহঃ।
বৌদ্ধশাস্ত্র।
বিক্রমালমঞ্জিকা।
দেবতা-তত্ত্বাদি।


প্রত্ন-কম্র-নন্দিনী নিরন্তরাভিরক্ষাকারিণী ॥

সাধুবোধবর্দ্ধিনী জ্ঞানকর্মশালিনী।


শ্রীরামপুর—মাহেশ।

সত্যযন্ত্র।

প্রিন্টার—শ্রীগিরিশচন্দ্র গঙ্গোপাধ্যায়।

[illegible]

অপেক্ষা আছে; যে সকল (সর্ব্বদা ব্যবহার্য্য বাহ্য) বস্তুর বোধ, বিজ্ঞান-নিরপেক্ষ বলিয়া আপাতত অনেকের ভান হইতে পারে, পরং সে সমস্তেরও আদিম নির্ণেয় অবস্থাতে উপদেশের বা বিজ্ঞানের অপেক্ষা অবশ্যই হইয়াছে, জাত-শিশুর বয়োবৃদ্ধ্যনুসারে যেমন যেমন ব্যবহার বিজ্ঞান পরিবর্দ্ধিত হইতে থাকে, তেমনি ক্রমে পদার্থ সকল পরিচিত হয়—কেহ কাহাকেউ একটি পাত্র আনিতে বলিলে তাহাতে সে ব্যক্তি যাহা আনিয়া উপস্থিত করে, তাহাই পাত্র—তৎস্থানীয় দর্শকেরা ইহা অনায়াসে বুঝিতে পারে, সেই ব্যক্তি তাহার পরক্ষণেই সেই দর্শকবর্গের কাহাকেউ পাত্র আনিতে বলিলে, আদিষ্ট ব্যক্তি সেই ব্যবহার দর্শনরূপ বিজ্ঞানের বলে অবশ্য তাহাই আনিয়া উপস্থিত করিবে, কিন্তু তাহার পূর্ব্বক্ষণে (অর্থাৎ যাবৎ ঐ ব্যবহার দর্শন করে নাই) তাবৎ ঐ পাত্রকে বার বার নিরীক্ষণ করিয়াও চক্ষুর্দ্বারা গ্রহণীয় আকারবিশিষ্ট এক পদার্থ—এই মাত্র জানিয়াছিল, অপর বিশেষ ভাব কিছুই জানিতে পারে নাই, হয়ত উহা অন্য কোন কার্য্যকর বস্তু বলিয়াই জানিয়াছিল। এতাবতা সমস্ত পদার্থেরই প্রকৃত পরিচয় বিজ্ঞান-সাপেক্ষ।

তন্মধ্যে বিশেষ এই—যে সমস্ত পদার্থ, বাহ্য এবং অতি স্থূলধী-গ্রাহ্য ও নিরন্তর ব্যবহৃত, সেই সমস্ত পদার্থের জ্ঞানেও বিজ্ঞানের অপেক্ষা ছিল, এবং উহারই মধ্যে যে সমস্ত পদার্থ কিঞ্চিৎ সূক্ষ্ম বা কথঞ্চিৎ অব্যবহার্য্য তাহার প্রকৃত তত্ত্ব নিরূপণার্থ অদ্যাপি বিজ্ঞানের অনুকম্পা অবলম্বন করিতেই হইতেছে।

# कारण्डव्यूहः।

ओं नमो रत्नत्रयाय ॥

श्री आर्य्यावलोकितेश्वराय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय ॥

एवम्मया श्रुतमेकस्मिन् समये भगवान् श्रावस्त्यां विहरति स्म। जेतवनेऽनाथपिण्डदस्यारामे महता भिक्षुसङ्घेन सार्द्धमर्द्धत्रयोदशभिर्भिक्षुशतैः सम्बहुलैश्च बोधिसत्वशतसहस्रैः ॥

तद्यथा—वज्रपाणिना च बोधिसत्वेन महासत्वेन। ज्ञानदर्शनेन च बोधिसत्वेन महासत्त्वेन। वज्रसेनेन च बोधिसत्वेन महासत्वेन। गुहगुप्तेन च बोधिसत्वेन महासत्वेन। आकाशगर्भेण च बोधिसत्वेन महासत्वेन। सूर्य्यगर्भेण च बोधिसत्वेन महासत्वेन। अनिक्षिप्तधूरेण च बोधिसत्वेन महासत्त्वेन। रत्नपाणिना च बोधिसत्वेन महासत्वेन। समन्तभद्रेण च बोधिसत्वेन महासत्वेन। महास्थामप्राप्तेन च बोधिसत्त्वेन महासत्वेन। सर्व्वणीवरणविष्कम्भिना च बोधिसत्वेन महासत्वेन। सर्व्वशूरेण च बोधिसत्वेन महासत्वेन। भैषज्यसेनेन च बोधिसत्वेन महासत्त्वेन। अवलोकितेश्वरेण च बोधिसत्वेन महासत्वेन। वज्रमतिना च बोधिसत्वेन महासत्वेन। सागरमतिना च बोधिसत्वेन महासत्वेन। धर्म्मधरेण च बोधि-

सत्त्वेन महासत्त्वेन । पृथिवीवरलोचनेन च बोधिसत्त्वेन महासत्त्वेन । आश्वासहस्तेन च बोधिसत्त्वेन महासत्त्वेन । मैत्रेयेण च बोधिसत्त्वेन महासत्त्वेन । एवम्प्रमुखैरशीतिकोटयो बोधिसत्त्वाः सन्निषण्णाः ॥

अन्ये च द्वात्रिंशद्देवनिकाया देवपुत्राः सन्निपतिताः महेश्वरनारायणदेवपुत्रपूर्व्वंगमाः ।—शक्रो देवानामिन्द्रो ब्रह्मा च सहाम्पतिश्चन्द्रादित्यवायुवरुणादयो देवपुत्राः सन्निपतितास्तस्मिन् पर्षदि ।

अनेकानि च नागराज-शत-सहस्राणि सन्निपतितानि । तद्यथा—उपलालश्च नागराजः । एलपत्रश्च नागराजः । तिमिङ्गिरश्च नागराजः । गवाम्पतिश्च नागराजः । शतशीर्षश्च नागराजः । हुलुरश्च नागराजः । बह्वदकश्च नागराजः । तक्षकश्च नागराजः । गोशीर्षश्च नागराजः । मृगशीर्षश्च नागराजः । नन्दोपनन्दौ च नागराजौ । वात्सीपुत्रश्च नागराजः । अनवतप्तश्च नागराजः । सागरमतिश्च नागराजः । एवम्प्रमुखाण्यनेकानि नागराजशतसहस्राणि सन्निपतितानि ॥

अनेकानि च गन्धर्व्वराजशतसहस्राणि सन्निपतितानि । तद्यथा—दुन्दुभिस्वरश्च गन्धर्व्वराजः । मनोज्ञस्वरश्च गन्धर्व्वराजः । सहस्रभुजश्च गन्धर्व्वराजः । सहाम्पतिश्च गन्धर्व्वराजः । शरीरप्रह्लादनश्च गन्धर्व्वराजः । निर्नादितभूर्य्यश्च गन्धर्व्वराजः । अलङ्कारभूषितश्च गन्धर्व्वराजः । कुमारदर्शनश्च गन्धर्व्वराजः । सुवाहुयुक्तश्च गन्धर्व्वराजः । धर्म्मप्रियश्च गन्धर्व्वराजः । एवम्प्रमुखाण्यनेकानि गन्धर्व्वराजशतसहस्राणि सन्निपतितानि तस्मिन् पर्षदि ।

अनेकानि च किन्नरराजशतसहस्राणि सन्निपतितानि



तद्यथा—सुमुखश्च किन्नरराजः । रत्नकिरीटी च किन्नरराजः । स्वातिमुखश्च किन्नरराजः । प्रहसितश्च किन्नरराजः । चक्रव्यूहश्च किन्नरराजः । पुष्पावकीर्णश्च किन्नरराजः । मणिश्च किन्नरराजः । प्रलम्बोदरश्च किन्नरराजः । दृढवीर्य्यश्च किन्नरराजः । सुयोधनश्च किन्नरराजः । शतमुखश्च किन्नरराजः । द्रुमश्च किन्नरराजः । एवम्प्रमुखाणि अनेकानि किन्नरराजशतसहस्राणि सन्निपतितानि तस्मिन् पर्षदि ॥

अनेकाश्चाप्सरसः शतसहस्राः सन्निपतिताः । तद्यथा—तिलोत्तमा नामाप्सरसा । सुव्यूहा नामाप्सरसा । सुवर्णमेखला नामाप्सरसा विभूषिता नामाप्सरसा । कर्णधारा नामाप्सरसा । अमृतविन्दु नामाप्सरसा । परिशोभितकाया नामाप्सरसा । मणिप्रस्थ नामाप्सरसा । चूडकानामाप्सरसा । मृदुका नामाप्सरसा । पञ्चभूर्य्याभिमुखा नामाप्सरसा । रतिकरा नामाप्सरसा । काञ्चनमाला नामाप्सरसा । नीलोत्पला नामाप्सरसा । धर्म्माभिमुखा नामाप्सरसा । सुक्रीड़ा नामाप्सरसा । कल्पाकरा नामाप्सरसा । सुव्यूहमुखा नामाप्सरसा । केयूरधरा नामाप्सरसा । दानन्ददा नामाप्सरसा । शशी नामाप्सरसा । एवम्प्रमुखाण्यनेकाप्सरसः शतसहस्राणि सन्निपतितानि तस्मिन् पर्षदि ॥

अनेकानि च नागकन्याशतसहस्राणि सन्निपतितानि । तद्यथा—विभूषणधरा नाम नागकन्या । स्वातिमुखा नाम नागकन्या । जयश्री र्नाम नागकन्या । विजयश्री र्नाम नागकन्या । मुचिलिन्दा नाम नागकन्या । त्रिजटा नाम नागकन्या । विद्युल्लोचना नाम नागकन्या । स्वातिगिरि र्नाम नागकन्या ।

शतपरिवारा नाम नागकन्या। विद्युत्प्रभा नाम नागकन्या। महौषधिर्नाम नागकन्या। जलविन्दुर्नाम नागकन्या। एकशीर्षा नाम नागकन्या। शतवाहुर्नाम नागकन्या। शमती नाम नागकन्या। अनाक्रान्तगता नाम नागकन्या। सुभूषणा नाम नागकन्या। पाण्डलमेघा नाम नागकन्या। रथाभिरूढा नाम नागकन्या। त्यागगता नाम नागकन्या। अभिन्नपरिवारा नाम नागकन्या। पुलिन्दा नाम नागकन्या। सागरकुक्षिर्नाम नागकन्या। छत्रमुखा नाम नागकन्या। धर्म्मपीठा नाम नागकन्या। मुखरा नाम नागकन्या। वीर्य्या नाम नागकन्या। सागरगम्भीरा नाम नागकन्या। मेरुश्रीर्नाम नागकन्या। एवम्प्रमुखाण्यनेकानि नागकन्याशतसहस्राणि सन्निपतितानि तस्मिन् पर्षदि।

अनेकानि च गन्धर्व्वकन्याशतसहस्राणि सन्निपतितानि। तद्यथा—प्रियमुखा नाम गन्धर्व्वकन्या। प्रियन्ददा नाम गन्धर्व्वकन्या। सुदर्शना नाम गन्धर्व्वकन्या। वज्रश्रीर्नाम गन्धर्व्वकन्या। वज्रमाला नाम गन्धर्व्वकन्या। अनादर्शना नाम गन्धर्व्वकन्या। सुमालिनी नाम गन्धर्व्वकन्या। वनस्पतिर्नाम गन्धर्व्वकन्या। शतपुष्पा नाम गन्धर्व्वकन्या। मुकुलिता नाम गन्धर्व्वकन्या। रत्नमाला नाम गन्धर्व्वकन्या। मुदितपुष्पा नाम गन्धर्व्वकन्या। सुकुक्षिर्नाम गन्धर्व्वकन्या। राजश्रीर्नाम गन्धर्व्वकन्या। दुन्दुभिर्नाम गन्धर्व्वकन्या। शुभमाला नाम गन्धर्व्वकन्या। विभूषितालङ्कारा नाम गन्धर्व्वकन्या। अभिनमिता नाम गन्धर्व्वकन्या। धर्म्मकाङ्क्षिणी नाम गन्धर्व्वकन्या। धर्म्मन्ददा नाम गन्धर्व्वकन्या। औदुम्बरा नाम गन्धर्व्वकन्या। शता-



कारा नाम गन्धर्व्वकन्या। पद्मावती नाम गन्धर्व्वकन्या। फलन्ददा नाम गन्धर्व्वकन्या। पद्मालङ्कारा नाम गन्धर्वकन्या। परिशोभितकाया नाम गन्धर्व्वकन्या। विलासेन्द्रगामिनी नाम गन्धर्वकन्या। पृथिवीन्ददा नाम गन्धर्वकन्या। सिंहगामिनी नाम गन्धर्वकन्या। कुमुदपुष्पा नाम गन्धर्वकन्या। मनोरमा नाम गन्धर्व्वकन्या। दानन्ददा नाम गन्धर्वकन्या। देववचना नाम गन्धर्वकन्या। क्षान्तिप्रिया नाम गन्धर्वकन्या। निर्व्वाणप्रिया नाम गन्धर्वकन्या। रत्नाङ्कुरा नाम गन्धर्वकन्या। इन्द्रश्रीर्नाम गन्धर्वकन्या। इन्द्रमघश्रीर्नाम गन्धर्वकन्या। प्रजापतिनिवासिनी नाम गन्धर्वकन्या। मृगराजिनी नाम गन्धर्वकन्या। स्फुलन्तश्रीर्नाम गन्धर्वकन्या। ज्वलन्तशिखरा नाम गन्धर्वकन्या। रागपरिमुक्ता नाम गन्धर्वकन्या। द्वेषपरिमुक्ता नाम गन्धर्वकन्या। मोहपरिमुक्ता नाम गन्धर्वकन्या। सुजनपरिवारा नाम गन्धर्वकन्या। रत्नपीठा नाम गन्धर्वकन्या। आगमनगमना नाम गन्धर्वकन्या। अग्निप्रभा नाम गन्धर्वकन्या। चन्द्रविम्बप्रभा नाम गन्धर्वकन्या। सूर्य्यलोचना नाम गन्धर्वकन्या। सुवर्णावभासा नाम गन्धर्वकन्या। उत्तरश्रीर्नाम गन्धर्वकन्या। सुवचा नाम गन्धर्वकन्या। एवम्प्रमुखाण्यनेकानि गन्धर्वकन्याशतसहस्राणि सन्निपतितानि तस्मिन् पर्षदि॥

अनेकानि च किन्नरकन्याशतसहस्राणि सन्निपतितानि। तद्यथा—मनसा नाम किन्नरकन्या। मानसी नाम किन्नरकन्या। वायुवेगा नाम किन्नरकन्या। वरुणवेगा नाम किन्नरकन्या। आकाशप्लवा नाम किन्नरकन्या। वेगजवा

नाम किन्नरकन्या । लक्ष्मीन्ददा नाम किन्नरकन्या । सुदंष्ट्रा नाम किन्नरकन्या । अचलश्री र्नाम किन्नरकन्या । धातुप्रिया नाम किन्नरकन्या । अवलोकितलक्ष्मी र्नाम किन्नरकन्या । कुटिला नाम किन्नरकन्या । वज्रमुष्टिर्नाम किन्नरकन्या । कपिला नाम किन्नरकन्या । सुभूषणभूषिता नाम किन्नरकन्या । विस्तीर्णललाटा नाम किन्नरकन्या । सुजनपरिसेविता नाम किन्नरकन्या । सहाम्पति र्नाम किन्नरकन्या । आकाशरक्षिता नाम किन्नरकन्या । व्यूहराजेन्द्रा नाम किन्नरकन्या । मणिचूड़ा नाम किन्नरकन्या । मणिधारिणी नाम किन्नरकन्या । मणिरोचनी नाम किन्नरकन्या । विद्वज्जनपरिसेविता नाम किन्नरकन्या । शताकरा नाम किन्नरकन्या । आयुर्द्ददा नाम किन्नरकन्या । तथागतकोशपरिपालिता नाम किन्नरकन्या । धर्म्मधातुपरिरक्षिणी नाम किन्नरकन्या । सततपरिग्रह धर्म्मकाङ्क्षिणी नाम किन्नरकन्या । सदानुकालदर्शिनी नाम किन्नरकन्या । नूपुरोत्तमा नाम किन्नरकन्या । लक्षणोत्तमा नाम किन्नरकन्या । आश्वासनी नाम किन्नरकन्या । विमोक्षकरा नाम किन्नरकन्या । सदानुवृत्ति र्नाम किन्नरकन्या । संवेगधारिणी नाम किन्नरकन्या । खड्गज्वलना नाम किन्नरकन्या । पृथिव्युपसङ्क्रमणा नाम किन्नरकन्या । सुरेन्द्रमाला नाम किन्नरकन्या । सुरेन्द्रा नाम किन्नरकन्या । असुरेन्द्रा नाम किन्नरकन्या । मुनीन्द्रा नाम किन्नरकन्या । गोत्रक्षान्ति र्नाम किन्नरकन्या । योगानुगता नाम किन्नरकन्या । बह्वाश्रया नाम किन्नरकन्या । शतायुधा नाम किन्नरकन्या । विभूषितालङ्कारा नाम किन्नरकन्या ।



मनोहरा नाम किन्नरकन्या । एवम्प्रमुखाण्यनेकानि किन्नरकन्याशतसहस्राणि सन्निपतितानि ॥

अनेकान्युपासकोपासिकाशतसहस्राणि सन्निपतितानि ॥

अनेकानि च परिव्राजक-निर्ग्रन्थशतसहस्राणि सन्निपतितानि ॥

यदा महासन्निपातश्चाभूत् तदाऽवीचौ महानरके रश्मयो निश्चरन्ति स्म । निश्चरित्वा जेतवनविहारमागच्छन्ति स्म । सर्वे ते विहारपरिशोभिता एव दृश्यन्ते स्म । दिव्यमणिरत्नोपलिप्ताः स्तम्भाः परिशोभिता एव दृश्यन्ते स्म । कूटागाराः सुवर्णोपचिता दृश्यन्ते स्म । लयने लयने सुवर्णरूप्यमयानि द्वाराणि दृश्यन्ते स्म । लयने लयने सुवर्णरूप्यमयानि सोपानानि दृश्यन्ते स्म । सुवर्णरूप्यमयानि प्रासादानि रूप्यमये प्रासादे सुवर्णमयानि स्तम्भानि दिव्यरत्नोपचितानि । सुवर्णमये प्रासादे रूप्यमयानि स्तम्भानि दिव्य रत्नोपशोभितानि । वहिर्जेतवनस्य पुरतः उद्याने नानाविधानि कल्पवृक्षाणि दृश्यन्ते स्म । सुवर्णदण्डानि रूप्यपत्राणि नानाविधालङ्कारप्रलम्बितानि । विचित्राणि चीवरवस्त्रप्रलम्बितानि । कौशिकवस्त्रप्रलम्बितानि । मुक्ताहारशतसहस्रप्रलम्बितानि । विविध-मौली-कुण्डल-स्रग्-दाम-केयूर-नूपुर-शतसहस्राणि प्रलम्बितानि । कर्णपृष्ठोत्तर्य्याणि स्तम्भानि मणिरत्नकटककेयूरकाणि प्रलम्बितानि संदृश्यन्ते स्म । तेन तत्र च रम्यावभासे तादृशानि कल्पवृक्षशतसहस्राणि प्रादुर्भूतानि । तस्मिन्नेव जेतवनविहारे वज्रमयाणि सोपानानि दृश्यन्ते स्म । द्वारकोष्ठे च मुक्तापटकलापप्रलम्बितानि । अनेकानि पुष्करिणीशतसह-

स्राणि प्रादुर्भूतानि। तत्र कानिचिदष्टाङ्गोपेतवारिणा परि-पूर्णानि—कानि चिन्नानाविधपुष्पपरिपूर्णानि। तद्यथा—उत्पल-पद्म-कुमुद-पुण्डरीक-मान्दार-महामान्दार-वडोडुम्वर-पुष्प-परिपूर्णानि—अन्यानि च पुनस्तत्र विविधानि काष्ठपुष्पाण्युत्पद्यन्ते। तद्यथा—चम्पकाशोक-करवीर-पाटलानिर्मुक्तकसुमनाग-न्यवार्षिकाणि। एतानि मनोरमाणि काष्ठपुष्पाणि प्रादुर्भूतानि इत्येवं तस्मिन् जेतवनविहारे समन्ततः परिशोभितानि दृश्यन्ते स्म॥

## इति जेतवनविहारवर्णनं नाम प्रथमप्रकरणम्।

---

## अथ अवीचि-शोषणं नाम द्वितीय प्रकरणम्।

अथ तस्मिन्नेव पर्षन्मध्ये सर्व्वणीवरणविष्कम्भी नाम बोधिसत्वो महासत्व उत्थायासनादेकांशमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवाँस्तेनाञ्जलिम्प्रणम्य भगवन्तमेतदवोचत्—परमाश्चर्य्याद्भुतप्राप्तोहं—भगवन्! कुत इमे रश्मयः समागच्छन्ति स्म? कस्यैषः? तथागतस्य विषय-प्रभावः? इति।

भगवानाह—नैष तथागत-प्रभावः। कुलपुत्रोऽवीचौ महानरके आर्य्यावलोकितेश्वरो बोधिसत्वो महासत्वः प्रविष्टः। तेन मे सत्वान् परिमोचयित्वा च प्रेतनगरं प्रविशति। तेन मे रश्मय उत्सृष्टाः॥

# কারণ্ডব্যূহ।

—:*:—

এই খানি বৌদ্ধদিগের সূত্র গ্রন্থ। বৌদ্ধদিগের ধর্ম্মশাস্ত্র অংশত্রয়ে বিভক্ত—সূত্র, বিনয় ও অভিধর্ম। সূত্র গ্রন্থ নয় খানি—প্রজ্ঞাপারমিতা, কারণ্ডব্যূহ, সদ্ধর্ম্মপুণ্ডরীক, লঙ্কাবতার, দশভূমীশ্বর, সমাধিরাজ, ললিতবিস্তর, সুবর্ণপ্রভাস, ও তথাগতগুহ্যক। প্রজ্ঞাপারমিতা বৃহৎ ও ক্ষুদ্র দুই প্রকার; বৃহৎ প্রজ্ঞাপারমিতা লক্ষ শ্লোকাত্মক, দ্বিতীয় খানি অষ্ট সহস্র শ্লোকাত্মক এই জন্য উহাকে অষ্টসাহস্রিকও বলা যায়; এবং কারণ্ডব্যূহকে গণ্ডব্যূহও বলাযায়।

বৌদ্ধদিগের গ্রন্থ সকল অতিপ্রাচীন, এমন কি ইহাদের অনেক গ্রন্থ বৈদিক-সম-কালের বলিলেও অত্যুক্তি হয় না। আমি যৎকালে 'বৌদ্ধদর্শন-সংগ্রহ' অধ্যয়ন করি, তদবধি ইহাদের মূল গ্রন্থ সকল এবং বৌদ্ধ-লিখিত বৌদ্ধশাস্ত্র সকল দর্শনার্থ অতীব উৎসাহিত হই, পরং তাদৃশ পুস্তক সমূহের দুষ্প্রাপতা নিবন্ধন দৈনন্দিন হতোদ্যমই হইতেছিলাম, পরে কলিকাতাস্থ এসিয়াটিক্-সোসাইটির অনুগ্রহে এবং তদীয় অধ্যক্ষকল্প মন্ত্রিবর শ্রীযুক্ত বাবু রাজেন্দ্রলাল মিত্র মহাশয়ের বিশেষ আনুকূল্যে তাদৃশ গ্রন্থের [illegible] অনেকাংশে সুপ্রাপতা হইলেও ইহাদের সমস্ত গ্রন্থ [illegible] অক্ষরে লিখিত থাকায় পুনর্ব্বার হতোদ্যমকল্প হইয়াছিলাম, পরে কিঞ্চিৎ যত্নেই

উপায় প্রমা-জ্ঞান, প্রমা-জ্ঞান উৎপন্ন হইলেই ভ্রম-জ্ঞান স্বয়ং (দীপাগতে অন্ধকারের ন্যায়) বিদূরিত হয়, সুতরাং তন্মূলক জ্ঞাত-জ্ঞানের নিবৃত্তি হইলে এবং ঐ বিশুদ্ধ প্রমা-জ্ঞান যথা-স্থিত রহিয়া যায়; এই জ্ঞাত-নিবৃত্তিই দর্শন-শাস্ত্রের প্রকৃত ফল, অতএব ঐ প্রমেয়টিকেই ফল-কোটি-নিবিষ্ট করা যায়।

প্রদর্শিত নিয়মে দর্শন-শাস্ত্রে প্রবিষ্ট হইলে, ঐ শাস্ত্রের নির্ণেয় ঐ চারিটি জ্ঞান-ভিন্ন আর কিছুই দেখা যায় না, এবং ঐ জ্ঞান-সকলের বিশেষণ অংশ সকল ত্যাগ করিলে, অর্থাৎ 'জ্ঞাত'-জ্ঞানের 'জ্ঞাত' এই ভাগটি এবং জ্ঞাত-মূল ভ্রম-জ্ঞানের 'ভ্রম' এই অংশটি ও তন্নিবারণোপায় প্রমা-জ্ঞানের প্রমা বিশেষণটি, ফল—জ্ঞাত-নিরূপিত অভাব-জ্ঞান, অর্থাৎ যাহা জানিয়াছিলাম তাহা নহে—ইহাও জ্ঞান; এই রূপে জ্ঞানই জ্ঞাতরূপে প্রমেয়; জ্ঞানই জ্ঞাত-মূলরূপে প্রমেয়, জ্ঞানই জ্ঞাত-নিবারণোপায়রূপে প্রমেয়, জ্ঞানই জ্ঞাত-নিবৃত্তিরূপে প্রমেয়। জ্ঞান ক্ষণিক পদার্থ; অর্থাৎ যখন যে জ্ঞানটি উৎপন্ন হয়, তদব্যবহিতোত্তরই তাহাকে আর পাওয়া যায় না, অমনি তৎস্থানাপন্ন আর একটি জ্ঞান দেখিতে পাওয়া যায়, প্রথম-দৃষ্ট জ্ঞানটি কোথায় যায় তাহার আর স্থিরতা থাকে না, এই ধারাবাহী ক্রমাগত জ্ঞানের সমাগম হইতেছে, এবং আসিবামাত্র কোথায় বিলীন হইয়া যাইতেছে, এই প্রকার জ্ঞানের অন্ত করা দূরে থাকুক কিঞ্চিদংশ গণনাও করা যাইতে পারে না, কত জ্ঞান হইয়াগেল এবং কত জ্ঞান হইবে ইহা কে নির্দ্দেশ করিতে পারে? পরং দর্শনকারেরা এই অনন্তজ্ঞানকে প্রদর্শিতরূপে চারিশ্রেণীতে এবং ঐ চারি-শ্রেণীকে ত্রি-কোটিতে বিভক্ত করিয়া হস্তামলকবৎ করিয়াছেন।



अथ सर्व्वणीवरणविष्कम्भी बोधिसत्वो महासत्वो भगवन्त-मेतदवोचत्। भगवन्नवीचौ महानरके कानि सत्वानि संविद्यन्ते। यत्र वीचिर्न्न प्रज्ञायते तत्रास्य धर्म्मन्देशयति। यस्याः कुड्य-प्राकार-पर्य्यन्ता अयोमयी भूमिः समनन्तर-प्रज्वलितै-कज्वालीभूता, विस्फुरद्रत्नकरण्डकवत् सं दृश्यते। तस्मिन्नेव महानरके आक्रन्दती कुम्भी तिष्ठति। तस्यामेव कुम्भ्या मनेकानि सत्वकोटीनियुतशतसहस्राणि प्रक्षिप्तानि। यथा वह्वुदकायां स्थाल्यां मुद्गा वा माषा वा चोर्द्ध्वं गच्छन्तोऽधो गच्छन्तः स्विद्यन्ते—पच्यन्ते। एवं ते सत्वा अवीचौ महानरके कायिकं दुःखं प्रत्यनुभवन्ति। तत् कथं भगवन्नवीचौ महानरके ऽवलोकितेश्वरो बोधिसत्वो महासत्वः प्रविशति?

भगवानाह—यथा कुलपुत्र! राजा चक्रवर्त्ती दिव्य-रत्नमयो यानै प्रविशति, महत्या चक्रवर्त्ति-राज्य-समृद्ध्या, एवमेव कुलपुत्रा वलोकितेश्वरो बोधिसत्वो महासत्व स्तस्मिन्नवीचौ महानरके प्रविशति। न च पुनस्तस्य कायान्यथाभावं गच्छति। यदा वीचि-महानरक-समीप मुपसङ्क्रामति, तदा अविचिर्म्महानरकः शीतीभाव मनुगच्छति, तदा ते यमपालपुरुषाः संवेग-चित्ताः परमोद्विग्नाश्चिन्तां समापद्यन्ते—किमस्मिन्नवीचौ महानरकेऽशुभ-निमित्तं प्रादुर्भूतम्!। यदावलोकितेश्वरो बोधिसत्वो महासत्वः प्रविशति, तदा तस्मिन् शकट-चक्र-प्रमाण-मात्राणि पद्मानि प्रादुर्भूतानि। सा च कुम्भी विस्फुटिता। तस्मिन्नेवाग्नि-खदा-याम्मधोः पुष्करिणी प्रादुर्भूता।

अथ ते यमपालपुरुषा असि-मुसल-भिन्दिपाल-तोमर-गदा-चक्र-त्रिशूलादीनुपसङ्गृह्य सर्व्वञ्चावीचि-परिस्कारं गृहित्वा येन स

यमो धर्म्मराजस्तेनोपसङ्क्रान्ता, उपसङ्क्रम्य यमं धर्म्मराजमेतद्वोचत् । यत् खलु देवो जानीयात् प्रथमं, सा चास्माकं कर्म्मभूमिर्निरवशेषं परिक्षीणा अभिरमणीय-संवृत्ता सर्व्वसुखसमर्प्पिता ।

यमो धर्म्मराज स्तानुवाच—किं कारणं युष्माकमपि कर्म्मभूमिः परिक्षीणा ?

यमपाल-पुरुषा ऊचुः—अपि च यत् खलु देवो जानीयात् प्रथमं, तस्मिन्नवीचिमहानरकेऽशुभनिमित्तं प्रादुर्भूतम् । सर्व्वं प्रशान्तं शीतीभाव मुपगतम् । कामरूपी च तत्र पुरुषः प्रविष्टो जटा-मुकुट-धरो दिव्यालङ्कार-भूषित-शरीरः परम-मैत्र-मानसः सुवर्ण-विम्ब मिव दृश्यते । स च तादृशः पुरुषस्तत्र प्रविष्टः । तस्य च प्रविष्टमात्राच्छकट-चक्र-मात्राणि पद्मानि प्रादुर्भूतानि । सा च कुम्भी विस्फुटिता । तस्मिन्नेवाग्निखदायां मध्येः पुष्करिणी प्रादुर्भूता ।

अथ स यमो धर्म्मराजश्चिन्ता मापेदे । कस्य पुनर्देवस्यायं प्रभावः ? अथ महेश्वरस्य महर्द्धिकस्य ? अथवा नारायणस्य पञ्चमहासमुद्र-नमस्कृतस्य ? अथवान्येषां महर्द्धिका-देव-पुत्राणामपि वर-प्रदानेनेदृशं फल-विशेषं संवृत्तम् ? ते चेह भूत्वानुप्राप्ताः ? अथवा राक्षस उत्पन्नः, एष महारावण-प्रतिद्वन्द्वी ? एवं स तत स्थित श्चिन्तयामास । स च दिव्येन चक्षुषा व्यवलोक्य तत्र देव-निकायेन पश्यति स्म—ईदृशं वरं कस्यान्यस्य ?

अथ स पुनरेवावीचौ महानरके व्यवलोकयति स्म । व्यवलोक्य तस्मिन्नेवावीचौ महानरकेऽवलोकितेश्वरं बोधिसत्त्वं महासत्त्वमेव पश्यति स्म ।

अथ स यमो धर्म्मराजो येनावलोकितेश्वरो बोधिसत्त्वो



महासत्त्वस्तेनोपसङ्क्रान्तः । उपसङ्क्रम्य भगवतः पादौ शिरसाभिवन्द्य स्तोत्र-विशेषं कर्त्तु मारब्धः । नमोस्त्ववलोकितेश्वराय, महेश्वराय, पद्मश्रिये, वरदाय, वशङ्कराय, पृथिवी-वर-लोचन-कराय, जगदाश्वासनकराय, शतसहस्रभुजाय, कोटीशतसहस्रनेत्राय, एकादशशीर्षाय, वड़वामुखपर्य्यन्ताय, धर्म्मप्रियाय, सर्व्व-सत्त्व-परिमोक्षण-कराय, कूर्म्म-मकर-मत्स्याश्वासनकराय, ज्ञान-राश्युत्तम कराय, प्रियन्ददाय, रत्नश्रिये, उत्तमाय, अवीचि-संशोषणकराय, ज्ञान-लक्ष्मलङ्कृताय, ज्ञान-प्रियाय, सर्व्व-देव-पूजित-नमस्कृताय, वन्दिताय, अभयन्ददाय, धर्म्मन्ददाय, षट्पारमिता-निर्द्देशन-कराय, सूर्य्यावलोकनकराय, धर्म्म-दीपङ्कराय, कामरूपाय, गन्धर्व्वरूपाय, काञ्चन-पर्व्वत-समारूढ़ाय, सागर-कुक्षि-गम्भीर-धर्म्माय, परमार्थ-योगमनुप्राप्ताय, सम्मुख-सन्दर्शन-कराय, अनेक-समाधि-शत-सहस्रावकीर्णाय, अभिरतिकराय, विच्छुरित-गात्राय, ऋषिपुङ्गव-कराय हृदि-निगड़-बन्धन-भय-त्रस्त-मार्ग-परिमोक्षण-कराय, सर्व्व-सत्त्वाभावसंयुक्ताय, बहु-परिवार-सम्बर्त्तनीयाय, उपचितकराय, चिन्तामणि-रत्नाय, निर्व्वाण-मार्गोपदर्शन-कराय, प्रेत-नगर-समुच्छोषण-कराय, छत्रभूत-जगत्-कराय, व्याधि-परिमोचन-कराय, नन्दोपनन्द-नाग-राज-कृत-यज्ञोपवीताय, अमोघ-पाश-सन्दर्शन-कराय, अनेक-मन्त्रशतावकीर्णाय-वज्र-पाणि-विद्रावण-कराय, त्रिलोक-भयङ्कराय, यक्षराक्षस-भूत-प्रेत-वेताल-डाकिनी-कुष्माण्डापस्मार-सन्त्रासनकराय, नीलोत्पल-चारु-नेत्राय, गम्भीर-धीराय, विद्याधिपतये-सर्व्व-क्लेश-विमोक्षण-कराय, विविध-बोधिमार्गोपचिताय, समारूढ़-मोक्ष-मार्ग-प्रवराय, आश्रय-चित्त-बोधि-मार्गोपचिताय, प्रेत-गति-परिमोक्षण-कराय, परमाणु-रजोपम-समाधि-शत-सहस्रा-

कोर्णाय । एवं यमोधर्म्मराजो विशेषतरं स्तोत्रावधानं कृत्वा पुनरपि यमो धर्म्मराजः त्रिः प्रदक्षिणीकृत्य तत्रैव प्रक्रान्तोऽभूत् ॥

## इति अवीचिशोषणं नाम द्वितीयप्रकरणम् ॥

अथ सर्व्वणीवरणविष्कम्भी भगवन्तमेतदवोचत्—कदा भगवन्नागच्छति अवलोकितेश्वरो बोधिसत्वो महासत्वः ?

भगवानाह—एष कुलपुत्रोऽवीची-महानरकान्निष्क्रम्य प्रेतनगरं प्रविष्टः। तत्रानेकानि प्रेत-शत-सहस्राणि पुरस्ताद्धावन्ति स्म। दग्ध-स्थूणाकृतिभिरस्थियन्त्रवदुच्छ्रितैः पर्व्वतोदरसन्निभैः सूचीच्छिद्रोपममुखैः। यदावलोकितेश्वरो बोधिसत्वो महासत्वः प्रेतनगर मुपसङ्क्रामति, तदा स प्रेतनगरः शीतीभावमनुगच्छति, सा च वज्राशनि र्व्युपशमिता, स च द्वारपालपुरुष उद्दण्ड-भिन्दिपालः कालकूट-व्यग्र-हस्तो लोहिताक्षः सततम् अस्यानुभावेन मैत्रचित्तं सम्भावयति—न च मे ईदृशेन कर्म्मभूमिना कृत्यम्।

अथार्य्यावलोकितेश्वरो बोधिसत्वो महासत्व स्तञ्च सत्वनिकायं दृष्ट्वा महाकरुणाचित्तमुत्पाद्य दशभ्यो हस्ताङ्गुलीभ्यो दश वैतरणीर्निष्क्रामयति। दशभ्यः पादाङ्गुलीभ्यो दश वैतरणीर्निष्क्रामयति। अतिकरुणाभिभूत-चेतसा अवलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य तेषां सत्वानामन्तिके सर्व्वरोमकूपेभ्योऽष्टाङ्ग-वारि-परिपूर्णा महानद्यो निष्क्रामन्ति। यदा च ते प्रेत-सत्वा स्तदुदक मास्वादयन्ति, तदा ते विपुल-कण्ठा भवन्ति, परिपूर्ण-गात्राश्च भवन्ति। तेन वै ते दिव्य-रस-रसाग्रोपेतेनाहारेण



सन्तर्पिताश्च भवन्ति। तदा मानुषिकीं चेतनामुपादायैव सांसारिकाश्चिन्तां विचिन्तयन्ति—अहो वत ! ते जाम्बुद्वीपका मनुष्याः सुखिताः ये शीतलां छायां परिसेवन्ति। सुखितास्ते जाम्बुद्वीपका मनुष्या ये मातापितरौ सततं परिग्रहमुपस्थानङ्कुर्व्वन्ति। सुखितास्ते सत्पुरुषा ये कल्याणमित्रं सततं समित मन्वेषयन्ति, परिग्रहं परिपालयन्ति। ते सत्पुरुषाः स-चेतना ये महायानं सततं समित मवगाहयन्ति। ते सत्पुरुषा य आर्य्यास्ताङ्गो-मार्गाय वास मुपवसन्ति। ते सत्पुरुषा ये धर्म्मदण्डीकामाकोटयन्ति। ते सत्पुरुषाः ये चटित-स्फुटितान् विहारान् प्रतिसंस्कारं कुर्व्वन्ति, प्रतिष्ठापयन्ति। ते सत्पुरुषा ये पूर्व्विकानि स्तूपविम्बानि चटित-स्फुटितानि विशीर्णभूतानि प्रतिसंस्कारं कुर्व्वन्ति। ते सत्पुरुषा ये धर्म्मभाणकांल्लेखकान्धारकान्वाचकान् सूत्रराजस्य श्रावकान् सततं समितं परिसेवन्ति, चोपतिष्ठन्ति। ते सत्पुरुषा ये तथागत-प्रातिहार्य्याणि विविधानि च तथागत-चङ्क्रमणाणि धर्म्मसराणि च पश्यन्ति। ते सत्पुरुषा ये प्रत्येक-बुद्ध-चङ्क्रमणाणि पश्यन्ति। ते सत्पुरुषा येऽर्हच्चङ्क्रमणाणि पश्यन्ति। ते सत्पुरुषा ये बोधिसत्व-विकुर्व्वितानि चङ्क्रमणाणि पश्यन्ति। इत्येवं ते प्रेतविषयं शरीर मनुविचिन्त्यमानसाः कामात्मभावोपपत्तिं प्रति परित्यजन्ति। तदा तस्य सकाशात् ‘कारण्डव्यूह’-महायान-सूत्र-रत्न-राज-शब्दो निश्चरति। तदा तेषां विंशति-शिखर-समुद्गतं सत्काय-दृष्टि-शैलं ज्ञान-वज्रेण भित्वा सर्व्वे ते सुखावत्यां लोक-धाता वुपपन्नाः आकाङ्क्षित-मुखा नाम बोधिसत्वा उपपन्नाः। अथावलोकितेश्वरो यदा ते सत्व-धातवः परिमोचिताः, सुपरि-

मुक्ताश्च यदा ते सर्वसत्वा बोधिसत्व-भूमा वुपपन्नाः, तदा ततः
प्रेत-नगरात् पुनरपि निष्क्रामति।

## इति सत्व-धातु-परिमोचणं नाम तृतीय-प्रकरणम्॥

---

अथ सर्व्वणीवरणविष्कम्भी भगवन्तमेतदवोचत्—भगवन्न-
द्यापि नागच्छत्यवलोकितेश्वरो बोधिसत्वो महासत्वः ?

भगवानाह—अनेकानि कुलपुत्र! सत्व-कोटि-नियुत-शत-सह-
स्राणि परिपाचयति। दिने दिने स आगत्य परिपाचयति।
नास्ति कुलपुत्र! ईदृशं प्रतिभानं तथागतानामपि यादृशं आर्य्या-
वलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य।

अथ सर्व्वणीवरणविष्कम्भी आह—केन प्रकारेण भगवन् ?

भगवानाह—भूत-पूर्व्व-कुल-पुत्रो विपश्वी नाम तथागतार्हन्
सम्यक्सम्बुद्धो लोक उदपादि। विद्याचरण-सम्पन्नः सुगतो लोक-
विदनुत्तरः पुरुष-दम्य-सारथिः शास्ता देवानाञ्च मनुष्याणाञ्च
बुद्धो भगवांस्तेन कालेन तेन समयेनाहं सर्व्वणीवरणविष्क-
म्भिन्! सुगन्धमुखो नाम वणिक्पुत्रोऽभुवम्। तदा मे श्रुता विप-
श्विन स्तथागतस्य सकाशात् आर्य्यावलोकितेश्वरस्य गुणोद्भावना।

अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतदवोचत्—कीदृशी
त्वया भगवन्! गुणोद्भावना श्रुता ? एताः सर्व्वा प्रवदतां विघ्न-
राज! भगवन्मना मे प्रबोधय, यादृशी त्वया भगवन्! गुणोद्भावना
आर्य्यावलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य श्रुता।

भगवानाह—चक्षुषोश्चन्द्रादित्यावुत्पन्नौ, ललाटान्महेश्वरः,



स्कन्धेभ्यो ब्रह्मादयो, हृदया न्नारायणो, दंष्ट्राभ्यां सरस्वती,
मुखतो वायवो जाताः, धरणी पादाभ्यां, वरुणश्चोदरात्। यदैते
देवा जाता आर्य्यावलोकितेश्वरस्य कायात् अथार्य्यावलोकितेश्वरो
बोधिसत्वो महासत्वो महेश्वरं देवपुत्रमेतदवोचत्—भवि-
ष्यसि त्वम्महेश्वरः कलियुगे प्रतिपन्ने कष्टसत्वधातु-समुत्पन्न
आदि-देव आख्यायसे स्रष्टारं कर्त्तारन्ते सर्व्वसत्वा बोधि-
मार्गेण विप्रहीणा भविष्यन्ति, य ईदृश-पृथग्जनेषु सत्वेषु
साङ्कथ्यङ्कुर्व्वन्ति।

आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका।
आलयः सर्व्वभूतानां लीलया लिङ्गमुच्यते॥ १ ॥

ईदृश म्मया कुल-पुत्र-विपश्विन स्तथागतस्य सकाशादार्य्या-
वलोकितेश्वरस्य गुणोद्भावना श्रुता॥

तदप्यतिक्रम्य शिखी नाम तथागतोऽर्हन् सम्यक् सम्बुद्धो
बभूव। विद्या-चरण-सम्पन्नः सुगतो लोकविदनुत्तरः पुरुष-दम्य-
सारथिः शास्ता देवानाञ्च मनुष्याणाञ्च बुद्धो भगवां स्तेन
कालेन तेन समयेनाहं सर्व्वणीवरणविष्कम्भिन्! दानशूरो
नाम बोधिसत्वो महासत्वोऽभुवम् तस्य शिखिनस्तथागतस्य
सकाशात् अवलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य गुणो-
द्भावना श्रुता॥

## इति चन्द्राद्युत्पत्तिर्नाम चतुर्थ-प्रकरणम्॥

---

अथ सर्व्वनीवरणविष्कम्भी भगवन्त मेतदवोचत्—कीदृशी भगवंस्त्वया गुणोद्भावनावलोकितेश्वरस्य श्रुता ?

भगवानाह—यदा सर्व्व-देवा नागा यक्षा गन्धर्व्वा राक्षसा असुरा मरुता गरुड़ा गन्धर्व्वा किन्नरा महोरगा मनुष्याः सन्निपतिताः सन्निषण्णा अभुवन्। यदा भगवान् महासन्निपातं दृष्ट्वा तासां पर्षदां मध्ये धर्म्म-साङ्कथ्यङ्कर्त्तुमारब्धाः। तदा भगवतो सुखद्वारा नानावर्ण्णा अनेकरश्मयो निस्सरन्तिस्म। तद्यथा—नील-पीत-लोहितावदात-माञ्जिष्ठ-स्फटिक-रजत-सुवर्ण्ण-नानाविध रश्मयो निश्चरन्ति स्म। निश्चरित्वा च दश दिग्विदिक्षु सर्व्वान् लोकान् धातूनवभाष्य पुनरेवागत्य तं शिखिनं भगवन्तं त्रिः प्रदक्षिणीकृत्य भगवतो मुखद्वारे प्रविष्टाः॥

## इति विविध-रश्मि-निःसरणंनाम पञ्चम-प्रकरणम्॥

समाप्तोऽयं सर्वनीवरणाविष्कम्भि-सम्वादो नाम प्रथम काण्डः।

---



কথায় কথায়,অর্থাৎ—দেখিতে দেখিতে,স্বর্ণময় রৌপ্যময় দ্বার সকল দেখা যাইতে লাগিল। কথায় কথায়, দেখিতে দেখিতে, স্বর্ণময় রৌপ্যময় সোপান সকল দেখা যাইতে লাগিল। স্বর্ণময় রৌপ্যময় প্রাসাদ সকল, রৌপ্যময় প্রাসাদে দিব্য-রত্ন-খচিত স্বর্ণময় স্তম্ভ সকল, স্বর্ণময় প্রাসাদে দিব্য-রত্ন-খচিত রৌপ্যময় স্তম্ভ সকল শোভিত হইতেছিল। জেত-বনের বহির্ভাগে সম্মুখের উদ্যানে নানাবিধ কল্প বৃক্ষ সকল দেখা যাইতে লাগিল। সেই সকল কল্প বৃক্ষের শাখা সকল স্বর্ণময়, পত্র সকল রৌপ্যময়; সেই সকল বৃক্ষের ফল রূপে নানাবিধ অলঙ্কার লম্বায়মান রহিয়াছে; বিচিত্র চীর, বিচিত্র বস্ত্র সকল লম্বায়মান রহিয়াছে; কাশীর প্রসিদ্ধ (বানারসী) বিবিধ বসন লম্বায়মান রহিয়াছে; লক্ষ লক্ষ মুক্তাহার লম্বায়মান রহিয়াছে; লক্ষ লক্ষ নানা প্রকার মস্তকের কুণ্ডল, মালা, নূপুর লম্বায়মান রহিয়াছে; কর্ণ-পৃষ্ঠের ভূষণ মণি,রত্ন,করণ্ডক, রত্ন-বলয়, রত্ন-কেয়ূর সকল লম্বায়মান রহিয়াছে—দেখা গিয়াছিল। সেই ভগবানের ভ্রমণেই এতাদৃশ কল্প বৃক্ষ সকল তথায় প্রাদু-র্ভূত হইয়াছিল।

সেই জেতবনে বিহারের সময়ে (সেই উদ্যানের) সোপান সকল মণিময় দেখা গিয়াছিল; দ্বারদেশ উদ্ঘাটিত ছিল এবং তাহাতে পট্ট-বস্ত্র-নির্মিত যবনিকা প্রলম্বিত ছিল।

তথায় অনেক লক্ষ পুষ্করিণীও প্রাদুর্ভূত হইয়াছিল। তাহার মধ্যে কতকগুলি অষ্টাঙ্গ-যুক্ত-জলে পরিপূর্ণ; কতক-গুলি নানাবিধ পুষ্প সমাচ্ছন্ন, (যথা—উৎপল পদ্ম, কুমুদ,

চারি প্রকার, বৈদান্তিকগণের মতে পাঁচ প্রকার, মীমাংসকদিগের মতে ছয় প্রকার, পৌরাণিকদিগের সপ্ত প্রকার।

প্রমাণ বিষয়ে মতভেদই প্রমেয়-নির্দ্ধারণে মতভেদের প্রকৃত কারণ। যদি সকলের মতে এক রূপই প্রমাণ হইত, তবে প্রমেয়-বিষয়েও এতাদৃশ মতভেদ ঘটিত না। যখন বিবিধ মতে বিবিধ প্রকার প্রমাণ দেখা যাইতেছে, তখন প্রমাণও প্রমেয়স্থল হইয়াছে তাহার সন্দেহ নাই। যাঁহারা একমাত্র প্রমাণ স্বীকার করেন, তাঁহাদিগকে দ্বিতীয় প্রমাণ স্বীকার করাইবার জন্য অবশ্যই বিচার উপস্থিত করিতে হইবে; যাঁহারা দ্বিতীয় প্রমাণও স্বীকার করিতেছেন, তাঁহাদের মতে সেই দ্বিতীয় প্রমাণটি প্রমেয় বলিয়া অবশ্য স্বীকার্য্য হইবে। বস্তুত যখন দার্শনিক দিগের প্রমাণানুযায়ী প্রমেয় স্বীকরণীয় এবং প্রমেয়াংশে পরস্পরের সম্পূর্ণ মতভেদ দেখা যাইতেছে, তখন তৎসমস্তই প্রমাণ-ভেদ-মূলক বলিতে হইবে; প্রমাণভেদই তাদৃশ প্রমেয়ভেদের মূল কারণ; এ অবস্থায় প্রমাণ-গুলিই যে আদৌ প্রমেয়-কোটি-সন্নিবিষ্ট হইবে তাহাতে সন্দেহ কি? এবং স্বমতানুযায়ী প্রমাণ স্বীকার করাইতে পারিলেই যে বাদী হস্তগত হইবে তাহাতেই বা আর বক্তব্য কি? ॥

(ইতি পরিভাষা।)

—০:-:০—



अथ तस्मिन्नेव पर्षदि रत्नपाणिर्नाम बोधिसत्वो महासत्व उत्थायासना देकांश मुत्तरासङ्गं कृत्वा दक्षिणज्जानुमण्डलं पृथिव्याम्प्रतिष्ठाप्य येन भगवां स्तेनाञ्जलिं प्रणम्य भगवन्त मेतदवोचत्— किंकारणं भगवन्नीदृशं निमित्तं प्रादुर्भूतं दर्शितम्?

भगवानाह—एष कुलपुत्रावलोकितेश्वरः सुखावत्या लोकधातो रागच्छति, तस्यागच्छमानस्येदं मयेदृशं निमित्तं प्रादुर्भूतं दर्शितम्!

अथ रत्नपाणिर्नाम बोधिसत्व आह—कीदृशानि तानि निमित्तानि दर्शयतु भवान्।

भगवानाह— यदा कुलपुत्रावलोकितेश्वरो बोधिसत्वो महासत्व आगच्छति, तदा विविधानि कल्पवृक्षा विस्तरन्ति, चूतवृक्षा विस्तरन्ति, कुन्दपुष्पाणि सततञ्जायन्ते, चम्पकावृक्षा अभिनमन्ति। अतिपुष्पावकीर्णाः पुष्करिण्यः प्रादुर्भवन्ति। रत्नवृक्षशतानि ततो दृश्यन्ते। विविधानि पुष्पवर्षाणि पतन्ति, रत्नवर्षाणि च प्रवर्षन्ति, विविधानि च रत्न-मणि-मुक्ता-वज्र-वैदुर्य-शङ्ख-शिला-प्रवाल-जातरूप-रजत-ताम्राणि प्रवर्षन्ति, दिव्यानि च वस्त्रवर्षाणि पतन्ति। तस्मिन्नेव विहारसमीपे सप्त रत्नानि प्रादुर्भूतानि। तद्यथा—हस्तिरत्नं मणिरत्नम् अश्वरत्नं स्त्रीरत्नं गृहपतिरत्नं परिणायकरत्नम्। एवं सप्त रत्नानि प्रादुर्भूतानि। भूमिः सुवर्णनिभासा संदृश्यते। यदा आर्य्यावलोकितेश्वरो बोधिसत्वो महासत्वः सुखावत्याः लोकधातो निःक्रान्तः, तदा सर्वपृथिवी षड़् विकारं प्रकम्पिता।

अथ रत्नपाणि बोधिसत्वो महासत्वो भगवन्त मेतदवोचत्—कस्य निमित्तानि भगवन्?

२ ग

25

भगवानाह— एष कुलपुत्रार्थ्यावलोकितेश्वरो महासत्वो बोधिसत्व आगच्छति, तस्यैष शुभनिमित्त मीदृशं प्रादुर्भूतम्। यदा चलति स तदा मनोरमं पद्मवर्षः पतति। तदावलोकितेश्वरो सहस्रपत्राणि पद्मानि सुवर्णदण्डानि वैदुर्य्यनिर्भाषाणि गृहीत्वा येन भगवांस्तेनोपसङ्क्रान्तः। उपसङ्क्रम्य भगवतः पादौ शिरसाभिवन्द्य भगवत स्तानि पद्मान्युपनामयति स्म। इमानि ते भगवन्नमिताभेन तथागतेनार्हता सम्यक् सम्बुद्धेन प्रहितानि, स तथागतः पृच्छत्यल्पातङ्कताम्, लघुतां, सुखस्पर्शविहारिताञ्च। ततो भगवता पद्मानि गृहीत्वा वामपार्श्वे स्थापितानि। तदार्थ्यावलोकितेश्वरस्य गुणोद्भावनां कुरुते— कीदृशी त्वया अवलोकितेश्वर! कर्म्मभूमि निःपादिता, सदा प्रेतेषु अवीचावुपपन्नेषु?। कालसूत्र-रौरवोपपन्नेषु सत्वेषु, हाहे तपने प्रेतायने महानरके, अग्निघटे महानरके, शाल्मलि-महानरके, अन्धकाले महानरके, शीतोदके महानरके— एवं चान्येष्वपि महानरके ये उपपन्नाः सत्वा स्तेषाञ्च कर्म्मभूमिं दृष्ट्वा तत्र मया सत्वपरिपाको मे कृतः कर्त्तव्यश्च। कृत्वा सर्व्वे चानुत्तरायां सम्यक् सम्बुद्धौ प्रतिष्ठापयितव्या न च तावत् त्वयानुत्तरा सम्यक् सम्बोधिरभिसम्बोधव्या, यावत्समन्ताद्दशभ्यो दिग्भ्यः सर्व्वक्षणोपपन्नाः सत्वा अरूपविशेषे निर्वाणधातौ न प्रतिष्ठापयिता भवेयुः॥

अथावलोकितेश्वरो बोधिसत्व इदं प्रश्नव्याहारं कृत्वा भगवतः पादौ शिरसाभिवन्द्यैकान्ते प्रक्रान्तः, प्रक्रमित्वा ज्वलन्निवाग्निपिण्ड आकाशेऽन्तर्हितः॥

इति तथागतसंवादो नाम षष्ठ प्रकरणम्।



अथ रत्नपाणि बोधिसत्वो भगवन्त मेतदवोचत्—परिपृच्छेय महं भगवन्! प्रश्नव्याहरणमुद्देशं, कीदृशोऽवलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य पुण्यसम्भारः?

भगवानाह—शृणु कुलपुत्र! निर्द्देशयामि—अस्यावलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य नामग्रहणात् पुण्यसम्भारस्य प्रमाणम्। तद्यथा—अपि नाम कुलपुत्र! केचिदेव सत्वा गङ्गानदी-वालुकोपमास्तथागतार्हन्तः सम्यक्सम्बुद्धाः दिव्य-कल्प-पुष्प-धूप-गन्ध-माल्य-विलेपन-चूर्ण-चीवर-छत्र-ध्वज-घण्टा-पताकाभि र्विविधाभिः, चीवर-पिण्ड-पात्र-शयनासन-यान-प्रत्यय-भैषज्य-परिष्कारै रुपस्थिता भवन्ति, यश्च तेषान्तथागतानां पुण्यस्कन्धः प्रभवति, अवलोकितेश्वरस्यैक-वालाग्रे स पुण्यस्कन्धः। तद्यथा—अपि नाम कुलपुत्र! द्वादशमासिकेन संवत्सरेण चतुर्म्महाद्वीपेषु रात्रिन्दिव मविच्छिन्नन्देवो वर्षति, तच्छक्य मेकैकं विन्दुं गणयितुम्! न तु कुलपुत्रावलोकितेश्वरस्य शक्यम्मया पुण्यसम्भारं गणयितुम्। तद्यथा—अपि नाम कुलपुत्र! महासमुद्रश्चतुरशीतियोजनसहस्राणि गाम्भीर्य्येण, अप्रमेयो वैपुल्येन, वडवामुखपर्य्यन्तं तत्रापि शक्य मेकैकं विन्दुं गणयितुम्! न तु कुलपुत्रावलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य शक्यते पुण्यसम्भारं गणयितुम्। तद्यथा—अपि नाम कुलपुत्र! चतुर्म्महाद्वीपेषु ये केचिच्चतुष्पादो सिंह-व्याघ्र-ऋक्ष-तरक्षु-मृगोष्ट्र-शृगालादयो गो-गर्दभाः पशवः हस्तिनोऽश्वा महिषा मार्जालादयः, एतेषु चतुष्पदेषु शक्यते मयैकैकं रोमं गणयितुम्! न तु कुलपुत्रावलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य शक्यते पुण्यसम्भारं गणयितुम्। तद्यथा— अपि नाम कुलपुत्र! कश्चिदेव कुलपुत्रो वा कुलदुहिता वा परमाणुरजोपमास्तथागता-

र्हतः सम्यक्सम्बुद्धा दिव्य-सौवर्ण-रत्नमयान् स्तूपान् कारयेद्धस्तशत-
सहस्र-प्रमाणं,कारयित्वा चैकदिने ध्यानावरोपणं कुर्य्यात्तच्छक्यश
या कुलपुत्र! तेषां सौवर्ण-रजतमयानान्तथागतानां करणेषु पुण्य-
स्कन्धं गणयितुम्! न तु कुलपुत्रावलोकितेश्वरस्य बोधिसत्वस्य शक्य-
ते पुण्यसम्भारं गणयितुम्। तद्यथा—अपि नाम कुलपुत्र! शक्यते म-
या शीर्षवनस्यैकैकं पत्राणि गणयितुम्! न त्ववलोकितेश्वरस्य शक्यते
मया पुण्यसम्भारं गणयितुम्। तद्यथा—अपि नाम कुलपुत्र! चतुर्म्म
हाद्वीपेषु स्त्री-पुरुष-दारक-दारिकास्ते सर्व्वे स्रोतापत्तिफले सक्ठ-
दागामिफलेऽनागामिफलेऽर्हत्वे प्रत्येकबोधौ नियोजयेयम्! यश्चैतेषु
पुण्यस्कन्धः अवलोकितेश्वरस्य पूर्व्ववद्वालाग्रे स पुण्यस्कन्धः॥

## इत्यवलोकितेश्वर-पुण्यस्कन्ध-कथनं नाम सप्तम-प्रकरणम् ॥

---

अथ रत्नपाणिर्बोधिसत्वो महासत्वो भगवन्तमेतदवोचत्—न
मे भगवन्! क्वचिदीदृशः अचिन्त्यास्तथागतानां पुण्यस्कन्धो दृष्टो वा
श्रुतो वा प्रागेव बोधिसत्त्वभूतस्य, यादृशो भगवतोऽवलोकितेश्व-
रस्य बोधिसत्त्वस्य पुण्यस्कन्धः।

भगवानाह—यत् खलु कुलपुत्र! मम सदृशाः गङ्गा-नदी-
वालुकोपमास्तथागता अर्हन्तः सम्यक् सम्बुद्धा भवेयुस्ते चैक-
स्थाने धारयेयुः सत्काराय दिव्य-कल्प-चीवर-पिण्ड-पात्र-शयना-
सन-यान-प्रत्यय-भैषज्य-परिष्कारैस्ते च तथागता अर्हन्तः सम्यक्
सम्बुद्धाः सर्व्वश्चैकत्र सन्निपात्यन्ते! सर्वे अवलोकितेश्वरस्य बोधिस-
त्वस्य महासत्वस्य न शक्नुवन्ति पुण्यस्कन्धं गणयितुम्। प्रागेव



कुलपुत्राहमेकाकी अस्मिन् लोकधातौ विहरामि, तत् कथं
शक्नुयां तस्य पुण्यस्कन्धं वाचा व्याहर्त्तुम्। अपिच कुलपुत्र! सर्व्वे
तथागता दशभ्यो वाग्भिः एवं वाच मभाषन्त—'ते सत्वा सुखिता
लोके भवन्ति ये अवलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य ना-
मधेयमनुस्मरन्ति। ते जरा-मरण-व्याधि-शोक-परिदेव-दुःख-दौर्म्म-
नस्येभ्यः परिमुक्ता भवन्ति,ते आपश्चिमसांसारिकं दुःखं नानु
भवन्ति, ते शुक्ल-पाण्डर-पटाइव राजहंसाः प्लुतवायुवेगाइव
गच्छन्ति सुखावती-लोकधातु ममिताभस्य तथागतस्य सम्मुखं
धर्म्म-श्रवणाय, धर्म्मं श्रुत्वा च सांसारिकं दुःखन्तेषां कायेन वाधते,
न च राग-द्वेष-मोहेन जरा-मरणं, न च तेषां क्षुत्पिपासादुखं कायेन
वाधते, न च ते गर्भावासदुःख मनुस्मरन्ति, तस्मिन्नेव पद्मे
जायन्ते। धर्मरसेन पूर्यमाणाः सततपरिग्रहं व्यवस्थापिताः
तावदस्मिंल्लोकधातौ तिष्ठन्ति, याव दवलोकितेश्वरस्य बोधि-
सत्वस्य दृढ़प्रतिज्ञा न परिपूरिता भवति, सर्व्वसत्वा सर्वदुःखेभ्यः
परिमोचिताः यावदनुत्तरायाः सम्यक् सम्बोधौ न प्रतिष्ठा
पिता भवन्ति॥

अथ रत्नपाणि बोधिसत्वो भगवन्त मेत दवोचत्—कतमेन
कालेन भगवतोऽस्य दृढप्रतिज्ञां परिपूरयति, सर्व्वसत्वाश्च मोक्ष-
मार्गे प्रतिष्ठापिता भवेयुः?

भगवानाह—बहुभिः कुलपुत्रकारणैः सत्वाः कारणात्
संसारे संसरन्ति, देवतासत्वान् परिपाचयति, तेषां सत्वानां
बोधिमाग्र्ग मुपदर्शयति। येन येन रूपेण वैनेयाः सत्वाः तेन
तेन रूपेण धर्म्मन्देशयति॥—तथागत-वैनेयानां तथागतरूपेण
धर्म्मन्देशयति। प्रत्येक-बुद्धवैनेयानां सत्वानां प्रत्येकबुद्धरूपेण धर्म्म-

न्दे्शयति। अर्हत्ववैनेयानां सत्वाना मर्हत्त्वरूपेण धर्म्मन्देशयति। बोधिसत्व-वैनेयानां सत्वानां बोधिसत्व-रूपेण धर्म्मन्देशयति। महेश्वर-वैनेयानां सत्वानां महेश्वर-रूपेण धर्म्मन्देशयति। नारायण-वैनेयानां सत्वानां नारायण-रूपेण धर्म्मन्देशयति। ब्रह्म-वैनेयानां सत्वानां ब्रह्म-रूपेण धर्म्मन्देशयति। इन्द्रवैनेयानां सत्वाना मिन्द्र-रूपेण धर्म्मन्देशयति। आदित्यवैनेयानां सत्वाना मादित्यरूपेन धर्म्मन्देशयति। चन्द्रवैनेयानां सत्वानां चन्द्ररूपेण धर्म्मन्देशयति। अग्निवैनेयानां सत्वाना मग्नि-रूपेण धर्म्मन्देशयति। वरुणवैनेयानां सत्वानां वरुणरूपेण धर्म्मन्देशयति। वायुवैनेयानां सत्वानां वायुरूपेण धर्म्मन्देशयति। नागवैनेयानां सत्वानां नागरूपेण धर्म्मन्देशयति। विघ्नपतिवैनेयानां सत्वानां विघ्नपतिरूपेण धर्म्मन्देशयति। यक्ष-वैनेयानां सत्वानां यक्षरूपेण धर्म्मन्देशयति। वैश्रवणवैनेयानां सत्वानां वैश्रवणरूपेण धर्म्मन्देशयति। राजवैनेयानां सत्वानां राजरूपेण धर्म्मन्देशयति। राजभटवैनेयानां सत्वानां राजभटरूपेण धर्म्मन्देशयति। मातृपितृवैनेयानां सत्वानां मातृपितृरूपेण धर्म्मन्देशयति। यथा यथा वैनेयानां सत्वानां तथा तथा रूपेण धर्म्मन्देशयति। एवं कुलपुत्रावलोकितेश्वरो बोधिसत्वो महासत्वः सत्वान् धर्म्मन्देशयति, परिपाचयति, निर्वाण-भूमि सुपदर्शयति॥

## इति वैनेय-धर्मोपदेशो नाम अष्टमम् प्रकारणम्॥

---

अथ रत्नपाणिर्बोधिसत्वो महासत्वो भगवन्त मेतदवोचत्—परमाश्चर्य्याद्भुतप्राप्तोऽहं भगवन्! न च मे कदाचि दस्माभि रीदृशो



विषयः दृष्टो वा श्रुतो वा। यादृशोऽवलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य विषय स्तादृश स्तथागताना मपि न संविद्यते॥

भगवानाह—अस्ति कुलपुत्रास्मिन्नेव जम्बुद्वीपे वज्र-कुक्षिर्न्नाम गुहा, तत्रानेकान्यसुरकोटीनियुतशतसहस्राणि प्रतिवसन्ति स्म, तत्र कुलपुत्रावलोकितेश्वरो बोधिसत्वो महासत्वो असुररूपेण सुराणां धर्म्मन्देशयति। इमञ्च कारण्डव्यूह-महायान-सूत्ररत्नराज मुद्दिशयति। धर्म्मश्रवणायागतानसुरानेवञ्च कथयति स्म—'असुराणान्धर्मं शृण्वन्तु भवन्तो ये चान्येऽसुरपर्षद स्ते मैत्रचित्ताः शान्तचित्ताः दयाचित्ताः सत्वाना मन्तिके हितसुखचिन्ताभावं समन्वाहृत्येमं कारण्डव्यूहं धर्म्मपर्य्यायं श्रोतव्यम्'।

अथ तेऽसुराः कृतकरपुटा अवलोकितेश्वरस्यान्तिक मिमं धर्म्मपर्य्यायं शृण्वन्ति स्म। ते सुखिता लोके ये ईदृशं चिन्तामणि सदृशं कारण्डव्युहं महायानसूत्ररत्नराज मभिमुखी कुर्वन्ति, शृण्वन्ति, श्रुत्वा चाभिश्रद्दधास्यन्ति प्रतीष्यन्ति, लिखिष्यन्ति, लिखापयिष्यन्ति, धारयिष्यन्ति, वाचयिष्यन्ति, पूजयिष्यन्ति, चिन्तयिष्यन्ति, परेभ्यश्च विस्तरेण संप्रकाशयिष्यन्ति, भावयिष्यन्ति, परमप्रीत्या गौरवेणाध्याशयेन च नमस्कुर्व्वन्ति। तेषां च पञ्चानन्तर्य्याणि कर्माणि क्षेपयन्ति क्षेपयित्वा परिशुद्धकाया भविष्यन्ति, जातिस्मराश्च; मरण-काले द्वादश तथागता उपसंक्रमिष्यन्ति, ते च सर्व्वे तथागता आश्वासयिष्यन्ति माभैषीः कुलपुत्र! त्वया कारण्डव्यूहं महायान-सूत्ररत्नराजं श्रुतं, विविधा स्तेर्थमार्गाः सञ्जीकृताः सुखावती गमनाय च तत्र सुखावत्यां लोकधातौ तवार्थे विचित्रञ्च ते छत्रं सिंहासनं सञ्जीकृतं, दिव्य-मौली कुण्डल-स्रग्-दाममीदृशस्य निमित्तम्, मरण-कालसमय-परिपन्थित एव

सुखावती मनुगच्छति। एवं स रत्नपाणे ! प्रतिविशिष्टतरं पुण्यफलं दर्शयन्नवलोकितेश्वरो बोधिसत्त्व महासत्त्वो निर्व्वाणिकीं भूमि मुपदर्शयति स्म, असुराणां निर्व्वाणपथ मुदर्शितं सर्व्वपापमति-निवारणार्थम्, अनुत्तरे बोधिमार्गे प्रतिष्ठापनार्थम् ॥

अथ रत्नपाणि र्बोधिसत्त्वो महासत्त्वो भगवतः पादौ शिरसाभिवन्द्य तत्रैव प्रक्रान्तः ॥

## इति असुराश्वासनं नाम
## नवम-प्रकरणम् ॥

अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतदवोचत्—अतिदुर्ल्लभं भगवन्नस्यावलोकितेश्वरस्य विकुर्व्वितानि श्रूयन्ते गुणोद्भावनानि च ॥

भगवानाह—अपिच कुलपुत्र ! तस्माद् वज्रकुक्षेर्यदा निष्क्रान्तः, काञ्चन-मयां भूम्यां प्रविष्ट स्तदा गुणोद्भावनां शृणु, तदपि पूर्व्वतरप्रवचनम्। तदपि समतिक्रम्य विश्वभूर्नाम तथागतोऽर्हन् सम्यक् सम्बुद्धो बभूव विद्याचरण-सम्पन्नः सुगतो लोकविदनुत्तरः पुरुष-दम्य-सारथिः शास्ता देवानाञ्च मनुष्याणां च बुद्धो भगवान् तेन कालेन तेन समयेनाहं सर्व्वणीवरणविष्कम्भी बोधिसत्त्वः क्षान्तिवादी ऋषिरभूत् गिरिगह्वरान्तरकर्व्वटस्थानवासी, मनुष्याणामवचरे पृथिवी-प्रदेशे व्यहरंस्तदा कालानुकालं मया तस्य विश्वभुवः तथागतस्य सकाशात् गुणोद्भावनावलोकितेश्वरस्य बोधिसत्त्वस्य महासत्त्वस्य श्रुता विविधसर्व्वसत्त्वपरिपाचनम्। अस्ति सर्व्वणीवरणविष्कम्भी न सा काञ्चनमयी नाम भुमिरस्ति यदुत्तरस्यां काञ्चनमयां भूम्यां गत्वा अवलोकितेश्वरो बोधिसत्त्वो महासत्त्वो ऽधोमुखानां सत्त्वानां धर्मन्देशयति स्म ॥



অনন্তর সর্ব্বণীবরণবিষ্কম্ভী ভগবান্‌কে বলিলেন—ভগবন্! মহাসত্ত্ব অবলোকিতেশ্বর বোধিসত্ত্ব কত দিনে প্রত্যাগমন করিবেন ?

ভগবান্ বলিলেন—বর্ণিত কুলপ্রদীপ অবীচি মহানরক হইতে নিঃসৃত হইয়া প্রেতনগরে গমন করিয়াছেন। সে স্থলে অনেক সহস্র প্রেতেরা তাঁহার সমক্ষে নৃত্য করিয়াছে, তন্মধ্যে কেহ কেহ দগ্ধস্তম্ভের ন্যায়, কেহ কেহ অস্থিমাত্রে নির্ম্মিত যন্ত্রবিশেষের ন্যায়, কেহ কেহ পর্ব্বতসদৃশ উদর ভরে আক্রান্ত, কাহার কাহারউ বা মুখ-চ্ছিদ্র সূচীবেধের অনুরূপ। (মহাসত্ত্ব অবলোকিতেশ্বর বোধিসত্ত্ব যৎকালে প্রেতনগর আক্রমণ করেন, তখন সেই প্রেতনগর শৈত্যভাব অবলম্বন করে—সেই বজ্ররূপ প্রাণঘাতিনী উল্কাও বিশেষরূপে উপশম প্রাপ্ত হইয়া থাকে—সেই বদ্ধ-ভিন্দিপাল*, নাগপাশধারী, লোহিত-নেত্র দ্বারপালেরা ইহাঁর প্রভাবে ভীত থাকিয়া সতত মৈত্রীভাব প্রকাশ করে, অধিকন্তু তাহারা বলে—আমাদের এতাদৃশ নির্দ্দয় কার্য্যালয়ে কর্ম্মচারী হইবার প্রয়োজন নাই।) আর্য্য অবলোকিতেশ্বর সেই জীবসমূহকে তাদৃশ অবস্থায় দেখিয়া অতিশয় করুণায় আর্দ্র হইয়া তাহাদিগকে স্বীয় হস্তদ্বয়ের দশ অঙ্গুলী দ্বারা দশটি বৈতরণী† উত্তীর্ণ করিতে লাগিলেন এবং স্বীয় পাদদ্বয়ের দশটি অঙ্গুলীর সাহায্যে অপর দশটি বৈতরণী উত্তীর্ণ করিতে লাগিলেন। সেই প্রাণীগণের নিকটে, অতিশয়

* ভিন্দিপাল হস্তপ্রমাণ ছোরা। ঐরূপ অস্ত্র যাহাদের কটিদেশে বদ্ধ আছে, তাহাকেই বদ্ধ-ভিন্দিপাল বলা যায়।

† "যমদ্বারে মহাঘোরে তপ্তা বৈতরণী নদী।"

অবয়ব হইতে পারে না, সেইরূপ সমস্ত পদার্থেই এই গুণত্রয়ের ত্রিবিধ ক্রিয়া অবশ্যই লক্ষিত হইবে, কারণ এই গুণত্রয়ই ক্রমে পৃথিব্যাদি আকারে পরিণত হইয়া অবশেষে ঐরূপ অবয়বে পরিণাম প্রাপ্ত হইয়াছে ; গুণত্রয় কার্য্যত এবং তদনুযায়ী নামত ত্রিত্বসংখ্যায় মণ্ডিত হইলেও বস্তুত উহা কদাপি ভিন্ন ভিন্ন আকারে বিযুক্ত হইতে পারে না পরং মাত্রার ন্যূনাতিরেক অবশ্যই ঘটিয়া থাকে ; ঐ পদার্থ ত্রয়ের মাত্রার ন্যূনাতিরেকেই জগতের বৈবিধ্য হইয়াছে, যদি ঐ ত্রয়ের একরূপ মাত্রায় সমস্ত পদার্থ আবির্ভূত হইত তবে যাবৎ পদার্থ এক প্রকারই হইত, মৃৎ পাষাণ হস্তী শূকরাদি কোনরূপ ভেদই লক্ষিত হইত না। সত্ব, রজ ও তম এই তিনটি মাত্র পরিণাম প্রাপ্ত হইয়া এই সুবিশাল চরাচর হইয়াছে—কিন্তু কোন পদার্থেই ঐ তিনটি সমান অংশে নাই, কোন না কোন একটির আধিক্য অবশ্যই থাকিবে যাহাতে যে পরিমাণে লঘুতার ভাব বা প্রকাশত্ব অধিক দৃষ্ট হইতেছে, তাহাতে সেই পরিমাণে সত্বের অংশ অধিক আছে—যাহাতে যে পরিমাণের চল ক্রিয়া বা প্রবর্ত্তকত্ব অধিক দেখা যায়, তাহাতে সেই পরিমাণে রজোগুণের ভাগাধিক্য বিবেচিত হইবে, যাহাতে যে পরিমাণে গুরুত্ব বা আবরকত্ব সমধিক প্রকাশ পাইবে, তাহাতে তত পরিমাণে তমোগুণের আধিক্য বিবেচিত হইবে। এইরূপ যে প্রাণী সমধিক সুখ আস্বাদন করে এমন কি পদার্থ মাত্রের উপভোগে এক প্রকার না এক প্রকার সুখ লাভ করে, তাহাকে সমধিক সত্বভাগী জানিতে হইবে ; যে প্রাণী সর্ব্বদাই



आर्य्याष्टाङ्गिकमार्गन्निर्वाणमुपदर्शयति । स ततः काञ्चनमय्यां भूम्यां निष्क्रमित्वा रूपमय्यां भूम्याम्प्रविशति । तत्र स पश्यति चतुष्पादिकानि सत्वानि पुरुषपुद्गलानि । दृष्ट्वा तेषामवलोकितेश्वरो बोधिसत्वो महासत्वो सर्वसत्वाना मेव धर्म्मन्देशयति । शृण्वन्तु भवन्तः सर्व्वे पुरुषपुद्गला अभिमुखन्धर्म्मपर्य्यायं प्रवर्त्तमान-सुचेतसा निर्व्वाणिकं सत्वर मनु विचिन्तयत ।

अथ ते सर्व्वे पुरुषा अवलोकितेश्वरस्य पुरतः स्थित्वा एतद्-वोचन्—आश्वासय । त्वं अन्धभूतानां सत्वानां मार्ग मुपदर्शको भव । अत्राणानां सत्वानां त्राणम्भव । अशरणानां सत्वानां शरणं परायणं मातापितृभूतो भव । तमोभिभूतानां सत्वानां प्रणष्टमार्गाणान्दीपभूतो भव । सचेतक ! महाकरुणया मोक्षमार्गस्योप दर्शक ! सुखितास्ते सत्वा ये तव सततं परिग्रहन्नाम मनुस्मरन्ति । उदीरयन्ति च । इदञ्च समागाढतरं दुःखन्न कदाचित् प्रत्यनुभवन्ति, मुञ्चन्ति ते हीदृशं दुःखं यादृशं वयं प्रत्यनुभवामः ॥

अथ स तेषां सत्वानां कारण्डव्युह न्नाम महायान-सूत्र-रत्न-राजं कर्णपुटे निश्चारयति स्म । ते च सत्वास्तं धर्म्मपर्य्यायं श्रुत्वा योन्यविहितघ्रोत्रकर्णपुटा निश्चरन्ति स्म । तदपि ते पुरुषाः श्रुत्वा वैवर्त्तिक-भुमि-निष्पादिताः परम-सुख-समर्पिताः संस्कृताः ॥

अथार्य्यावलोकितेश्वरो बोधिसत्वो महासत्व स्तस्या रूप्यमय्या निष्क्रम्यान्यतरायां भूम्याम्प्रविशति सत्व परिपाकाय महाकरुणा-संपीड़ित-हृदयो ऽयोमय्यां भूम्यां, यत्र स राजा बलिर् सुरेन्द्रो बद्धः । स तस्यैव सकाश मुप संक्रान्तः उपसंक्रम्य च राज्ञो

बले रसुरेन्द्रस्य दूरत चक्षुर्दर्शनं यातिस्म सुवर्णविम्बमिव रश्मिभिः प्रमुञ्चमाने र्नानावर्णैः ।

## इति काञ्चनमयभूम्याद्युपस्थानं नाम दशम-प्रकरणम् ॥

अथ स राजा वलि रसुरेन्द्रोऽवलोकितेश्वरं बोधिसत्वं महासत्वं दुरतएवागच्छन्तम्पश्यति स्म । दृष्ट्वा च सान्तःपुर-परिवारैः सार्द्धमनेकै रसुरशतसहस्रैः कुब्जवामनकादिभिः सहस्रपरिवारै र्गत्वा अवलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य पादयो र्निपत्येद मुदानयति स्म—

अद्य मे सफलं जन्म जीवितं पुण्यमेव च ।
अद्य मे हीदृशं चैव परिपूर्णं मनोरथम् ॥ १ ॥
अद्य मे आशयः पूर्णः परिशुद्धश्च दुःखतः ॥
यन्मया दर्शने सम्यक् दृष्ट्वा लोकैक वान्धवः ॥ २ ॥
तदा मे सर्व्वसौख्यञ्च कामे सन्तिष्ठते पुनः ॥
सौख्या भवन्ति ते सत्वा सर्व्वदुःख-विवर्ज्जिताः ॥ ३ ॥
संसार-वन्धनान्मुक्तास्तिष्ठन्ति सुखमोदकाः ।
ममापि दर्शनेनैव सर्वे च स्फुटित-वन्धनाः ।
दुराद्दूरतरं यान्ति गरुड़स्येव पन्नगाः ॥ ४ ॥

अथ स राजा वलिस्तस्य भगवतोऽवलोकितेश्वरस्य पादयोः प्रणिपत्य रत्न-पीठकं दत्वा दशनखाञ्जलिं कृत्वैव माह—

अपिच । भगवन्निषीदस्वास्मिन्नासने, अनुग्रहं कुरु, पापरतानां जात्यन्धभूतानां परदार-गमन-प्रशक्तानां प्राणातिपातोद्युक्तानां परप्राणहिंसकानां जरामरणभयभीताना मुद्विग्न



मानसानां संसार-दुष्ट-वार्त्तानां त्राता भव । अनाथानां माता-पितृ-भूतो भव । दुष्ट-दारुण-चण्ड-भूतानां भगवन्त्राता भव । परमदारुण-दुष्ट-प्रशमको भव । एषा मस्माकं वन्धनवद्धानां तव दर्शनेन सर्व्ववन्धनादयः परिमुक्ताः, स्फुटिताद्दूराद्दूरतरं पलायन्ति । तद्दर्शनमात्रेण यानि तानि राज्यचक्रवर्त्तिनश्च शुभकर्म्मजातानि चक्रवर्त्तिसुखानि मम संविद्यन्ते, तस्म भगवन्तादृशं धर्म्ममार्गं मुपदर्शय येनैवं पुनरेव वन्धनदुःखं न प्रत्यनुभवेम ! न च पुनरिमानि यानि सर्व्ववन्धनानि चक्षुषु आभास मागच्छेयुः ! ।

अथार्य्यावलोकितेश्वरो बोधिसत्वो महासत्वो राजानं वलि मसुरेन्द्र मेव माह—ये महाराज ! सत्वाना मन्तिके अविहिंसाचित्तं मुत्पादयन्ति, तथागत-शासने पिण्डपात्र मनु प्रयच्छन्ति, कारोपकारं वहुतरं कुर्व्वन्ति, न च तेषां केचित्सत्वाः स्वप्नेनापि पीड़यन्ति । अमुञ्च कारण्डव्युहं महायान-सूत्र-रत्नराजं लिखन्ति, लिखापयन्ति, अन्ततो नामधेयमपि, अस्माद्धर्म्मपर्य्यायं शृखन्ति, अस्य बोधिसत्वस्यैकमपि पिण्डपात्र मनुप्रयच्छन्ति । तेषाञ्च धर्म्मभानकाना मस्य धर्म्मपर्य्यायस्य धारकानां वाचकानां लेखकानां संश्रावकानाम्, अस्य च तथागतस्य धर्म्मपर्य्याय मुद्दिश्यैकदिवसमपि पुराभक्तमपि पिण्डपात्र मनु प्रदास्यति । ते सर्व्वे चक्रवर्त्ति-राज्य-लाभिनो भविष्यन्ति—न च कदाचित् क्षुत्पिपासा दुःखं प्रत्यनुभविष्यन्ति—न च कदाचिन्नरक-वन्धन-दुःखं प्रत्यनुभविष्यन्ति—न च प्रिय-विप्रयोग-दुःखम् अपिच सर्व्व-दुःखेभ्यो विमुच्यन्ते—सुखावती-लोकधातु मनुगमिष्यन्ति । तस्य च भगवतोऽमिताभस्य तथागतस्य पुरतः संमुखं

धर्म्मं श्रुत्वा व्याकरणमनु प्राप्स्यन्ति । अपिच महाराज ! श्रूयतां दानफलं ; तद्यथा—अपि नाम कुलपुत्र ! ये तथागतस्यार्हतः सम्यक् संबुद्धस्य तिष्ठतः परिनिर्वृतस्य वा पिण्डपात्र मनुप्रयच्छन्ति। तेषा मिदं पुण्यस्कन्धं प्रवक्ष्यामि । तद्यथा—अपि नाम कुलपुत्र ! द्वादशगङ्गा-नदी-वालुकोपमा मम सदृशा बोधिसत्वा महासत्वा भवेयुः ते चैकस्थाने धारयेयु र्दिव्यकल्प-तत्पुण्यप्रमाण मुद्गृहीतुं । सर्व्वसुखोपधानेन समुपतिष्ठमानाः तेपि सर्व्वे समग्रीभूता न शक्नुवन्ति एकस्य पिण्डपात्र-प्रदानस्य कुशलमूलसम्भारस्य शक्यते पुण्यस्कन्धं गणयितुम् । प्रागेवाह मेकाकी अस्मिन्नसुरभवने विहरामि । तद्यथा अपि नाम कुलपुत्र ! शक्यते मया परमाणु-रजसां प्रमाण मुद्गृहीतुं न तु कुलपुत्र ! शक्यम्मया पिण्डपात्रस्य पुण्यस्कन्धं गणयितुं । तद्यथापिनाम कुलपुत्र ! चतुर्षु महाद्वीपेषु स्त्रीपुरुष-दारक-दारिकादय स्ते सर्व्वे कृषिकर्म्मान्ते उद्युक्ता भवेयुः ! ते चतुर्म्महाद्वीपेषु नान्यं कृषिं कारयेयुः ! कालेन कालं नागराजानो वर्षधारा मनुप्रयच्छन्ति ते च सर्षपान् निष्पादयन्ते ! तच्चैकद्वीपखलं कुर्य्यात्! सर्व्वे ते स्त्रीपुरुषदारकदारिकादयः शकटैर्भारैः मुटैः पीठकै रुष्ट्रै र्गोभि र्गर्द्दभैः सर्व्वे ते मर्द्दयित्वा तस्मिन् महाखलके महान्तं राशिं कुर्य्यात् ! गोभिर्गर्द्दभादिभिर्म्मर्द्दयित्वा महान्तं राशिं निष्पादयित्वा तच्छक्यं कुलपुत्र ! एक मेकं फलं गणयितुं, न तु कुलपुत्र ! शक्यते पिण्डपात्रस्य पुण्यस्कन्धं गणयितुं । तद्यथापि नाम कुलपुत्र ! सुमेरुः पर्व्वतराजः चतुरशीति-योजन सहस्राणि अधस्ता-दुपगत ऊर्द्ध्वेण चतुरशीति-योजन-सहस्राण्युच्छ्रयेण च स कुलपुत्र ! भूर्जराशि र्भवेत् ! महासमुद्रो मेलन्दुकपरिमण्डलं भवेत् ! ये चतुर्द्वीपनिवासिनः स्त्रीपुरुष-दारक-दारिका स्ते च सर्व्वे लेखका भवेयुः ! तच्च सुमेरु-पर्व्वतराजान्तपर्य्यन्तं लिखितं भवेत् । तच्च कुलपुत्र ! शक्यं मयैकैवाक्षरं गणयितुं । न तु कुलपुत्र ! शक्यते पिण्डपात्रस्य पुण्यस्कन्धं गणयितुं । तद्यथापि नाम कुलपुत्र ! लेखकाः सर्व्वे ते दशभूमिप्रतिष्ठिता बोधिसत्वा भवेयुः पर्य्यापन्ना ! यच्च तेषान्दशभूमि प्रतिष्ठितानां बोधिसत्वानां महासत्वानाम्पुण्यस्कन्धं तमेकस्य पिण्डपात्रस्य पुण्यस्कन्धं गणयितुं । तद्यथापि नाम कुलपुत्र ! गंगाया नद्या वालुकासमुद्रस्य च शक्यम्मया एकैकं वालुकां गणयितुं, न तु कुलपुत्र ! शक्यते मया पिण्डपात्रस्य पुण्यस्कन्धंगणयितुम् । तद्यथापि नाम कुलपुत्र ! शक्यते मया सर्वमतुराम्भां प्रमाण मुद्गृहीतुं ! न शक्य मया कुलपुत्र ! पिण्डपात्रस्य पुण्यस्कन्धं गणयितुम् ॥



अथ वलि रसुरेन्द्रः इदञ्च तस्य भगवतो ऽवलोकितेश्वरस्यान्तिकात्पिण्डपात्रकुशलभूतस्य सुक्षेत्रारूढबीजपात्रभूतस्य निर्द्दिश्यमानस्य तत्सर्व्वं मनुमोद्य साश्रुदुर्द्दिन-वदनो गद्गदकण्ठः वाष्पपरिपूर्णं उच्छ्वसन्न वलोकितेश्वरं बोधिसत्व म्महासत्व मेतदवोचत्—कीदृशम्मया भगवन् ! वलिना कर्म्मकृतं दानं दत्तं ? येनेहैव जन्मनि वन्धन मनुप्राप्तं सान्तःपुरपरिवारेण कुक्षेत्रे मया दानन्दत्तं तस्यैव तत्कर्म्मणः फल मनुभवामि । अथवा सर्व्वज्ञ-क्षेत्रे भस्ममुष्टिमुपक्षिप्तमपि अमृतं परिनिष्पद्यते ॥ मया ज्ञानेन यज्ञं यजितं यदा मया च भगवन्तैर्थिकदृष्टिपर्य्यापन्नेन मानग्रस्तमानसेन च यज्ञं यजता महादान-समुच्छ्रयं कर्तुमारब्धं, तदा मे तत्र यज्ञे वामनकरूपेण याचनको हिंस्रः समागतः । तस्य मे मौली-कुण्डल-स्रग्दामानि रत्नाभरणानि च्छ-

स्वरथादीनि मुक्ता रत्नकवचानि मरकत-प्रलम्बितानि चामर-प्रलम्बितानि मुक्ताहाराणि मुक्तिकाजालप्रम्बितानि मुक्तिकाजालप्रतिच्छन्नानि मुक्तिकाकलापजालाङ्गुलीकानि सौवर्ण-घटिका रूप्य-निबद्धानि रण-रणायमानानि (अन्यानि च) कपिला-सहस्राणि रूप्यपादानि सौवर्ण-शृङ्गानि मुक्ताजालप्रलम्बितानि मुक्तिकाजालप्रतिच्छन्नानि अर्घपात्रसमायुक्तानि नाना विचित्र-घण्टारव-समायुक्तानि तादृशानि कपिलानि सहस्राणि (अन्यानि च) कुमारीणां शतसहस्राणि परमया गुर्वरुण-पुष्करलतया समन्वागतानां नानाविचित्राणां कन्यालक्षण-समलङ्कृतानां परमरूपशोभनाना मप्सरसामपि प्रतिस्पर्द्धिनीनां दिव्यालङ्कार-विभूषितानां मौलीकुण्डल-स्रग्दाम-परिक्षेपिकाणां केयूर-कटक-नूपुर-कटिमेखला-हस्तोत्तर्य्या- कर्णपृष्ठोत्तर्या- हस्ताङ्ग -लोय-समायुक्तानां सरसरायमाणमाला-समायुक्तानां नानाङ्गोप-रक्त-वस्त्र-प्रावृतानाम्। (अन्यानि) रत्न-पीठशतसहस्राण्यनेकानि सुवर्णराशि-रूप्यराशीनि रत्नराशीनि स्थापितानि। अनेकानि च वस्त्राभरणानि स्थापितानि। अनेकानि च गोकुल-शतानि स-गोपाल-समायुक्तानि सज्जीकृतानि अनेकान्यन्नपान-शतानां स्थापितानि दिव्यरसारसाग्रोपेतान्याहाराणि सज्जीकृतानि, अनेकानि सुवर्ण-रूप्य-मयानि दण्डानि, रत्नसंयुक्तानि सततं व्यवस्थापितानि, अनेकानि सुवर्ण-रूप्य-मयानि सिंहासनानि रत्न-संयुक्तानि च। दिव्यानि चामर-दण्डानि छत्राण्युपानहानि रत्नपरिवेष्ठितानि। अनेकानि सुवर्णमयानि रूप्य-मयानि मौलि-कुण्डल-स्रग्दाम-सहस्राणि रत्नोपचितानि। तस्मिन् स मया राज्ञां शतसहस्रान् सन्निपतितान्, ब्राह्मणशतस-



हस्रं सन्निपतिपतितम्। अनेकानि क्षत्रिय-शतसहस्राणि सन्निपतितानि। तदाहं भगवन्नेवं स्थान-स्थितानां यथा सन्निपतितानां दृष्ट्वा विस्मय मापन्नः त्रिशिवाराणि एकच्छत्रां पृथिवीं कृतवान्। तत्र मया पात्र भूतेष्विदं दानं दातुमारब्धम्। एतत्पौर्विकं पापं प्रति देशयामि क्षत्रिय भार्य्याणां गुर्विणीनां यावद्‌दयं स्फुटयित्वा कुमार-कुमारिका जीविता व्यपरोपिताः। ततस्ते च महाक्षत्रियाः सर्व्वे मया हड्निगड़-बन्धनैर्बद्धा नीत्वा ताम्र-गुहाया मनेकानि क्षतिय-शतसहस्राणि पञ्चबन्धनबद्धा कृत्वानि स्थापितानि पङ्क-राण्डव-प्रभृतीनि तस्यामेव यक्ष-गुहाया मुपयमानि कीलकानि, शृंखला-समायुक्तानि तेषां क्षत्रियाणां हस्तपादानि बद्ध्वा स्थापितानि। तदा मे सर्व्वद्वाराणि जृम्भीकृतानि। प्रथमं द्वारं काष्ठमयं, द्वितीयं द्वारं खदिरमयं, तृतीयं द्वार मयोमयं, चतुर्थं द्वारं ताम्रमयं, पञ्चमं द्वारं रूप्यमयं, षष्ठं द्वारं सुवर्णमयं, सप्तमं द्वारं रत्नमयम्। एतानि सप्त द्वाराण्येकैकद्वारे पञ्च पञ्च शतानि कपाटानि यन्त्र-समायुक्तानि। तस्मिन् सुवर्णमये द्वारे सप्त पर्व्वतान्युपर्य्युपरि स्थापितानि; एकैकस्मिन्द्वारे एकैकपर्व्वतानि उपर्य्युपरि स्थापितानि। ततोऽहं पश्चाद्दशरथ-पुत्रमन्वेषयामि। क्वचिद्दिवसे मक्षिका-रूपेण, क्वचिद्दिवसे भ्रमर-रूपेण-क्वचिद्दिवसे वराह-रूपेण, क्वचिद्दिवसे मानुष-रूपेण, रूपं कृत्वा दिने दिने मृगपक्ष्यादि-नाना-जन्तु-रूपेण। न च संमुखं तं समनुपश्यामि। तदा मे नु विचिन्तयित्वा यत्नः प्रारब्धः॥

तदा च मे दशरथ-पुत्रेणावतार-प्रेक्षिणा गत्वा तेन द्वार-स्थापिता सप्त पर्व्वता उत्पाटिता उत्पाटयित्वा लघुनीवान्यप्रदेशे क्षोर-

यित्वा उच्चैः शब्देन तेषां क्षत्रियाणा मारोचयति स्म। युधिष्ठिर-नकुल-सहदेव-भीमसेनार्ज्जुन-कौरवादिभिः। अन्ये राजानः शब्द मनुश्रुतं श्रुत्वा रस माश्वास्य स्वस्थकाया व्यवस्थिताः। स च तानेव माह—जीवन्तो युष्माक मथवा मृताः? ते कथयन्ति—जीवामो भगवन्! तेन महावीर्य्येण पुरुषेण सर्व्वाणि तानि द्वाराणि भग्नानि। यावत्ता स्वगुहायां पश्यति, सर्व्वे ते राजानो वन्धन-वद्वा दृष्ट्वा च नारायणं सर्व्वे ते परस्परं विचिन्तयन्ति। अथ वलिरसुरेन्द्रो मृतः कालगतः? अथवा पुनरपि मरण-कालोऽस्माकं भूतः।

अथ ते कथयन्ति वरमस्माकं संग्राम भूमौ मरणन्तु वन्धनवद्धानां मरणम्। यदा वन्धनवद्धाः कालं कुर्य्याम तदा क्षत्रियधर्म्म मस्माकं विनश्यति। यदा संग्रामभूमौ कालं कुर्य्याम तदा स्वर्गोपगा वयम्भवेम।

अथ ते राजानः सर्व्वे स्वकं स्वकं गृहं गताः। तदा रथयोग्यान्यस्त्राणि स्वकस्वकानि सज्जीकृतानि, यदा ते रथं सज्जीकुर्व्वन्ति महार्हाणि शस्त्राणि, तदा दशरथ-पुत्रेण वामनकरूप मभि निर्माय, मृगाजिनेनोत्तरीय्य, वेणुदण्ड मुपगृह्य, पीठिका मुपगृह्य सम्प्रस्थितः मस्तकाश्रम्। द्वार मागतः द्वारपालै रनुरुद्धः। मा प्रविश वामनक! ब्राह्मण! इति।

स कथयति—दूरादेवाह मागतः।

अथ स द्वारपालस्त मेतदवोचत्—ब्राह्मण! कतमस्मा भूमि स्त्वमागतः?

स तमाह—चन्द्रद्वीपाद्राजर्षिरहमागतः।

अथ स द्वारपालपुरुषो गत्वा वलि मारोचयति—देव!



করিয়াছ ?। কালসূত্র রৌরব নামক নিরয়ে পতিত জীব-গণের প্রতি, হাহ তপন প্রেত-নিকেতন মহানরকে, অগ্নি-ঘট মহানরকে, শাল্মলি মহানরকে, অন্ধকাল মহানরকে, শীতোদক মহানরকে,—এবং অন্যান্য মহানরকে যে জীবগণ উপস্থিত রহিয়াছে তাহাদিগেরও কর্ম্মভূমি দর্শন করিয়া যে স্থলেও তাহাদিগকে পবিত্র করা আমাদের কর্ত্তব্য, করিয়াও থাকি। এইরূপ ক্রিয়াগুলি করিলে তোমরা সম্যক্‌রূপে প্রশংসিত বোধি বলিয়া সম্বোধনের উপযুক্ত হইবে ; যাবৎ এই দশদিকে প্রতিক্ষণে সমুৎপন্ন জীবগণকে অরূপ নির্ব্বাণ মার্গে প্রতিষ্ঠিত করিতে না পারিতেছ, তাবৎ বোধি নামের প্রকৃত সার্থক্য লাভ করিতে সক্ষম হইতেছ না।

বোধিসত্ত্ব অবলোকিতেশ্বর এই প্রশ্নের প্রকৃত উত্তর করিয়া এক মনে ভগবান্ তথাগতের পাদদ্বয়ে শিরোবলুণ্ঠন পূর্ব্বক বন্দনা করত প্রস্থান করিলেন, এবং তৎক্ষণাৎ জ্বলন্ত অগ্নিপিণ্ডের ন্যায় আকাশে অন্তর্হিত হইলেন।

## ইতি তথাগত সংবাদ নামক যষ্ঠ প্রকরণ।

—০ঃ-ঃ০—

অনন্তর রত্নপাণি বোধিসত্ত্ব ভগবান্‌কে ইহা বলিলেন—ভগবন্! আমি আপনাকে একটি প্রশ্নের প্রকৃত উত্তর জিজ্ঞাসা করিতে অভিলাষ করিয়াছি। মহাসত্ত্ব বোধিসত্ত্ব আর্য্য অবলোকিতেশ্বরের নাম কীর্ত্তনের পুণ্যভার কীদৃশ ?

ভগবান্ বলিলেন—কুলপুত্র! শ্রবণ কর ; এই মহাসত্ত্ব

দাহিকা শক্তির অবরোধ হইতে পারে কিন্তু প্রকৃতির কার্য্য-জনন অবস্থা ক্ষণার্দ্ধ মাত্রের জন্যও স্তব্ধী ভাব অবলম্বন করিতে পারে না ; এই প্রসবধর্ম্মিতার প্রভাবেই এই চরাচরের সৃষ্টি-স্থিতি প্রলয় হইতেছে।—ইহা অচেতন পদার্থ অর্থাৎ জড়, জ্ঞান-বর্জ্জিত। যদিচ বুদ্ধিও প্রকৃতিরই বিকৃতি কিন্তু বুদ্ধি চেতনের সান্নিধ্যে অর্থাৎ জ্ঞানস্বরূপ অনুভয় পদার্থের সাহিত্যে জ্ঞান বলিয়া বোধ হয় বাস্তবিক পক্ষে বুদ্ধিও অচেতন (ইহার বিচার পরে দেখান যাইবে)।—প্রকৃতি যেরূপ জ্ঞান-বর্জ্জিত, সেইরূপ জ্ঞানস্বরূপও নহে ; উহা বিষয়াকার অর্থাৎ যেরূপ মৃত্তিকাদি সমস্ত পদার্থ জ্ঞানে গ্রহণ করা যায়, এইজন্য উহাদিগকে বিষয় অর্থাৎ জ্ঞানে গ্রহণীয় বলা যায়; ইহাও সেইরূপ জ্ঞানের গ্রাহ্য অতএব বিষয়—এইজন্যই ইহাকে সাধারণও বলা যায় অর্থাৎ প্রকৃতি যেরূপ জাতীয় পদার্থ ইহাও সেই জাতীয় পদার্থ সুতরাং সাধারণ, অর্থাৎ জ্ঞানবান্ বা জ্ঞান-স্বরূপ বলিয়া তাহাদিগ হইতে কোন রূপ বিভিন্ন পদার্থ নহে—অপরঞ্চ পূর্ব্বেই বলা হইয়াছে যে, সত্ত্ব,রজ ও তম এই গুণত্রয়ের সমানাংশের যে অবস্থা, যে অবস্থায় এই গুণত্রয় সমান অংশে অবস্থিতি করে সেই অবস্থাই প্রকৃতির প্রকৃত অবস্থা সুতরাং ইহাকে ত্রিগুণাত্মক বলাও ন্যায়ানুগত।

এতাবতা এই প্রকৃতি পদার্থকে—অব্যক্ত, জগৎ-কারণ, কারণ-শূন্য, অ-তিরোভাবী, সমস্ত-কার্য্য-ব্যাপক, নিষ্ক্রিয়, পরিণামাতিরিক্ত ভাব-শূন্য, কার্য্য সমস্তের আশ্রয়, নিরবয়ব, স্বতন্ত্র ; বিবেক-হীন, প্রসবধর্ম্মি, অচেতন, বিষয়, সাধারণ ও ত্রিগুণাত্মক—এই ষোড়শ প্রকারে পরিচিত করা যায়। তন্মধ্যে বিবেক-হীন প্রভৃতি ছয়টি পরিচয় প্রকৃতি-বিকৃতি ও বিকৃতি পদার্থেরও আছে (অগ্রেই প্রকাশ হইতেছে)॥



आगत स्ते वामनको ब्राह्मणः। अथ स वलि स्तमेत दवोचत्—कीदृशं वस्तु याचते ?

अथ स द्वारपाल स्तमेत दवोचत्। देव! न त मनुजानामि।

अथ स वलिस्तमेत दवोचत्—गच्छन्तु भवन्त आनीयतां ब्राह्मणः। स तै द्वारपाल-पुरुषै राहूतोक्तः। प्रविश महाब्राह्मण !! स प्रविष्टः, रत्नपीठ मनुप्रदत्तम्। शुक्रस्तत्रैव व्यवस्थितः। स च तस्योपाध्याय इति ख्यायते। स तं बलिमेत दवोचत्—एष काल पुरुषोऽवप्रविष्टः, अवश्यं ते विघातो भविष्यति। वलि स्त मेतद वोचत्—कथं जानासि भगवन्? शुक्र उवाच—जानामऽहम् तस्य निमित्तानि चिह्नानि च दृष्ट्वा॥

वलि राह—किमु पाचं वयं कुर्य्यामः ? अथ नारायणेन विचिन्त्य अवश्यन्दानस्य विप्रतिसारं भविष्यति। तेन मे सरस्वती मुखे न्यस्ता तदा स कथयति—आगच्छ ब्राह्मण! कीदृश मभिप्रायो भवतः ? स प्रविश्यैत दवोचत्—द्विपदभूमी याचयामि। वलिरुवाच—यदि त्वं ब्राह्मण! द्विपदं याचसे? मया त्रीणि पदानि तेऽनु प्रदत्तानि, स प्रतिग्रहं तस्योप गृह्य स्वस्तिमुपवद्यानुगृहीतम् तेन तिलपानीयसुवर्णसहितम्। ततस्तेन वामनकरूपमन्त धापितम्।

अथ शुक्रो वलि मेत दवोचत्—राजन्! कथितम्मया कालपुरुष एष प्रविष्टः। न च त्वया प्रमाणं कृतं वचनम् तस्यैतत् कर्म्मफल मनुभव। तेनात्मानं महाप्रमाणीकृतं। तस्य चन्द्रादित्यौ स्कन्धेऽव्यवस्थितौ गृहीत्वासौ निगड़चक्रधनुस्तोमरभिण्डिपाला-सन्नज्य।

अथ वलिरसुरेन्द्रोऽधोमुखं प्रपतितः, स्मृतिभ्रष्ट-थरथरा-

यमाम: स्थित:। किं कृत्य स्वहस्तेन मया विपं भक्षितम् द्विपदानि परिपूरितानि, तृतीयं पदन्न संविद्यते। तदा स कथयति—तृतीयस्य पदस्य संविद्यते यन्मम प्रतिग्रहं याचितं, कीदृशं पापं करोम्यहम्।

अथ नारायणस्त मेत दवोचत्— यत्राहं स्थापयामि तत्र त्वया स्थातव्यम्।

अथ स वलि रसुरेन्द्र स्त मेत दवोचत्—यादृशं त्वयाज्ञप्तं तादृशं करोम्यहम्।

सत्यं कुरुषे ? स कथयति।

सत्यं सत्यं करोम्यहम्।

तेन सत्यपाशैरबद्धः। सा च यज्ञभुमि र्विनाशिता; तानि च भाण्डानुच्छिष्टीकृतानि ; ता अपिच कुमारिका: पाण्डवै: कौरवै र्विध्वंसिता स्तानि च सुवर्णमयानि सिंहासनानि दिव्यानि छत्राण्युपानहानि रत्नपरिवेष्टितानि च वस्त्राभरणानि च सुवर्णखण्डानि सुवर्णकटकानि रत्नखचितानि कपिलानि कौरवपाण्डवैर्विध्वंसितानि ; सा च यज्ञभूमिर्विनाशिता॥

अथ स वलिरसुरेन्द्रो यज्ञभूमे र्निष्क्रान्त: शरीर-चिन्ता मापेदे। दाता वलिरुदार-यज्ञ मुपास्य कालदानस्य दत्तस्य बन्धनमेव लब्धवान्। नमोस्तु दैवाय यथैवकर्त्ता सर्त्ता स नीत्वा पातालमुपस्थापित:। शान्त: पुरपरिवार:। आख्यातं हि मया भगवन्! भूतपूर्व्वं कुशीले मया दानन्दत्तं तस्यैतत्कर्म्मफलम् अनुभवामि तथा त्राता भवाहि मे भगवन्नाथ न भूयो दुःख माप्नुयाम्।

अथ वलि स्तं भगवन्त मार्य्यावलोकितेश्वरं बोधिसत्त्वम्महासत्त्वं स्तोत्र-विशेषै: स्तोतुमारब्ध:। "त्राणं भवाहि शुभपद्म-



हस्त! पद्मश्रियालङ्कृतशुद्धकाय! अमितामभमूर्त्ते शिरसा नमामि। जटार्द्धमध्ये चिन्तामणिमूकुट-धराय। शुभपद्महस्ताय। पद्मश्रिया समलङ्कृताय। जटामुकुट धराय। सर्व्वज्ञ वशीकृताय। बहुसत्त्वाश्वासनकराय। हीनदीनानुकम्पाय। दिवाकरवररोचनकराय। पृथिवीवररोचनकराय। भैषज्यराजोत्तमाय। सुशुद्धसत्त्वाय। परमयोगमनुप्राप्ताय। मोक्षप्रवराय मोक्षप्रियाय। चिन्तामणिवत्सदृशाय। धर्म्मगञ्जपरिपालनकराय। षट्पारमितानिर्द्देशनकराय। सुचेतनकराय।"—इदं स्तोत्रं मया कृत मवलोकितेश्वरस्य सुखितास्ते सत्त्वा ये तव नामधेय मनुस्मरन्ति। मुच्यन्ते ते कारसूत्रै रौरवोपपन्नेष्ववीच्युपपन्नेषु प्रेतनगरोपपन्नेषु ये तव नामधेय मनुस्मरन्ति। मुच्यन्ते ते बहव: पापदुःखात् सुचेतनास्ते सत्त्वा ये तव नामधेय मनुस्मरन्ति। गच्छन्ति ते सुखावतीलोकधातु ममिताभस्य तथागतस्य धर्म्मं मनुस्मरन्ति शृण्वन्ति।

अथ आर्य्यावलोकितेश्वरो वलेरिन्द्रस्य व्याकरणमनु प्रयच्छतिस्म। भविष्यसि त्व मसुरेन्द्र! श्रीर्नाम तथागतोऽर्हन् सम्यक् संबुद्धो विद्याचरणसम्पन्न: सुगतो लोकविदनुत्तर: पुरुषदम्यसारथि: शास्ता देवानाञ्च मनुष्याणाञ्च बुद्धो भगवान्। सर्व्वे ते सुरा वैनेया भविष्यन्ति। तत्र तव बुद्धिक्षेत्रे न राग शब्दो न द्वेष शब्दो न मोह शब्दो भविष्यति; षडक्षरी महाविद्या लब्धलाभा भविष्यति। तेन तस्य धर्म्मदक्षिणा उपनामिता शतसहस्रमूल्यं मुक्ताहार मुपनामितं मौलीकुण्डलं च नानारत्न-समुच्चितम् उप नामितञ्च।

अथार्य्यावलोकितेश्वरो धर्म्मदेशनां कर्तु मारब्ध:— शृणु महाराज! नित्ये ध्रुवे शाश्वते मानुष्यके ये चिन्तयन्ति सततपरिग्रहं महाभोगान्यनुविचिन्तयन्ति दासी-दास-कर्म्मकरपौरुषे-

यान् यानि च महार्हाणि वस्त्र-शय्यासनानि ये च महार्हा निधान-धनधान-धनधान्य-कोष-कोष्टागरा अज्ञानास्ते सत्वा ये पुत्र-दार-दारिका-मनुविचिन्तयन्ति भार्य्या मातापितरौ एभिर्व्वस्तुभिर्व्वियुक्तास्ते स्वप्नोपमाइवदृश्यन्ते मरणकारसमये न कश्चित्तेषां त्राता भवति। यदा प्राणेद्वारणभवति तदाजम्बुद्वीपम्विपरीतम्पश्यति। अथ महतीं वैतरणीम्पूयशोणित-परिपूर्णाम्पश्यन्ति ये च महार्हा वृक्षास्तान् प्रदीप्तान् सम्प्रज्वलितानेकज्वालीभूतान् पश्यन्ति ; दृष्ट्वा च समापद्यन्ते। ततो यमपालपुरुषैः कालपाशैर्व्वध्वानीयन्ते। त्वरितं त्वरितं क्षुरधारोपचिते महापथे पादा विशीर्य्यन्ते, उत्क्षिप्ते पादे येऽन्याः पादाः प्रादुर्भवन्ति अनेकैः काक-गृध्र-श्वानादिभिर्भक्ष्यन्ते ; महती नारकी या वेदनाम्प्रत्यनुभवन्ति। ततः क्षुरधारोपचितामहापथादवतीर्य्य यत्र षोड़शांगुलिप्रमाणानि कण्टकानि तत्रानीयते ; ततएकैकपादे पञ्च पञ्च शतानि कण्टकानि प्रविशन्ति। सचाक्रन्दति विषय-पाप-रतेन सत्त्वेन कर्म्म कृतम्।

अथ ते यमपालपुरुषा एवमाहुः—मार्षा न त्वया तथागतस्य पिण्डपात्रं निर्य्यातितम्। न च त्वया धर्म्मगण्डीमाकोटामाना श्रुता। न बुद्ध-नाम गृहीतम्। न च त्वया क्वचिद्दानानि दीयमानानि दृष्टानुमोदितानि। न च त्वया क्वचित् प्रदेशे स्तूपबिम्बानि प्रदक्षिणीकृतानि।

स कथयति—अश्राद्धोऽभूवम्पापरतो बुद्ध-धर्म्म संघपरिवर्ज्जितः पापमित्र-परिगृहीतः कल्याण-मित्र-परिवर्ज्जितश्च।

ते कथयन्ति—तस्यैतत् कर्म्म फलम् ह्यनुभवेसे।

ग ते यमपालकै र्नीयते चैतत्-कर्म्म-भूमिमुप दर्शयितुम्।



अथ ते यमपुरुषा नीत्वा कालसूत्रे महानरके क्षिपन्ति। क्षिप्त्वा चैकैक शक्तिशतं काये विध्यन्ति तदपि जीवति, द्वितीयं शक्तिशतं काये विध्यन्ति तदपि जीवति, तृतीयं शक्तिशतं काये विध्यन्ति तदपि जीवति। यदा कालञ्च कुर्वन्ति तदाग्निखदा-मध्ये क्षिपन्ति। तदपि कालन्न कुर्व्वन्ति ततस्ते तप्तायोगुडामुखे विष्कम्भन्ते दह्यन्ते तेषामोष्ठमपि दन्तानि विशीर्य्यन्ते तालूनि विस्फुटन्ते कण्ठमपि तालुमपि हृदयमपि यन्त्रवत्कला निगुडायमाना सर्व्वं तं कायं दह्यन्ते। एव मेव हा! राजन्! कश्चित् त्राता भविष्यति,परलोके तस्मात्तर्हि तं महाराजयत्नेन पुण्यं कर्त्तव्यम् एवं सानुलोमिको धर्म्मदेशता। कृत्वा च तं राजानं वलिमसुरेन्द्र मेव माह—अप्रमत्तेन भवितव्यं, न पुनः कदाचित् प्रमोदचारिणा भवितव्यं। एवं च बहुदोषदुष्टोयं गृहावासः परमदारुण-नरक-भूमिप्रपातनः-तस्मात्तर्हि महाराज! अप्रमत्तेन भवितव्यम्। पापभीरुणा परलोकं दर्शितम॥

अपिच महाराज! ममान्तिकाद्धर्म्मदेशनां शृण्वतो निरवशेषाणि पापस्कन्धानि न च सुपरिशुद्धानि सर्व्वदुःखतरगाढवन्धनैः परिमुक्तः। सुखावती-लोकधातु-गमनाय तव पन्थानं परिशुद्धम्। यत्र तत्र च तव सप्तरत्नमयं पद्मासनं प्रादुर्भूतं भविष्यति। यत्र रत्नपद्मे निषद्य तस्य भगवतोऽमिताभस्य तथागतस्यार्हतः सम्यक् सम्बुद्धस्यान्तिकात् इमं सर्व्वदुःखपापस्कन्धं पापशमनं सर्व्वदुर्गतिसाधनं अनन्तमणि-महापुण्य-निर्द्देशं कारण्डव्यूह महायान सूत्ररत्नराजं त्वं श्रोष्यसि, श्रुत्वा च तत्रैव व्याकरणमनुप्राप्स्यसे अनुत्तरायां सम्यक् सम्बोधौ तावत् सुपरिशुद्ध-बोधि-चित्तालङ्कारनाम बोधि सत्व-जन्म प्रतिलप्स्यसे। यावदनुत्तरां सम्यक् सम्बोधिमभि संबुद्धो भविष्यति॥

अथार्यावलोकितेश्वरो बोधिसत्वो महासत्व स्तस्य च वलेरसुरेन्द्रस्य इमं सर्व्वदुर्गति-परिशोधनं बोधिसत्वालङ्कार-कारण्डव्यूहं नाम धर्म्मालोकं नाम देशयित्वा तं राजानं वलिमसुरेन्द्रं समाश्वास्यैवेद मवोचत्। गमिष्याम्यहमस्मि जेतवने महाविहारेऽय महासन्निपातो भवति।

## ॥ इति वलि-समाश्वासनं नामैकादश प्रकरणम्॥

---

ततो ऽवलोकितेश्वरेण बोधिसत्वेन महासत्वेन रश्मय उत्सृष्टाः। अनेकानि नानावर्णानि नील-पीत-लोहितावदातानि माञ्जिष्ठ-स्फटिक-रजतवर्णानि। गत्वा च विश्वभुवस्तथागतस्य पुरतो व्यवस्थितानि। तदा ते देवा नागा यक्षा राक्षसा असुरा गरुडाः किन्नरा महोरगा मनुष्याः सन्निपतिताः। अनेकानि बोधिसत्वशतानि सन्निपतितानि॥

अथ तेषां बोधिसत्वानाम्मध्ये गगणगञ्जो नाम बोधिसत्व उत्थायासना देकांश मुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवां स्तेनाञ्जलिम्प्रणम्य भगवन्त मेतदवोचत्—कुतो भगवन्! रश्मय आगच्छन्ति?

भगवानाह—एष कुलपुत्रावलोकितेश्वरो बोधिसत्वो महासत्वो वले रसुरेन्द्रस्य भवने विहरति, तेन तस्मान्निष्क्रामित्वा ऽमी रश्मयः प्रमुक्ता स्ततोऽमी रश्मय आगच्छन्ति पुनस्तस्यैव सकाशं गताः॥

अथ गगणगञ्जो बोधिसत्वो महासत्वो भगवन्त मेतदवोचत्—केनोपायेन पश्येय महमवलोकितेश्वरं बोधिसत्वं महासत्वम्?

भगवानाह—एष कुलपुत्र इहैवागच्छ यवलोकितेश्वरः। यदा





अवलोकितेश्वरो बोधिसत्वो महासत्वो वलेरसुरेन्द्रस्य भवनान्निःक्रान्तः तदा जेतवने महाविहारे दिव्यानि पुष्प-वर्षाणि पतन्ति, दिव्यानि कल्पवृक्षशतानि परमशोभनीयानि, रत्नालङ्कार-शतसहस्राणि, प्रलम्बितानि मुक्ताहारशतसहस्राणि प्रलम्बितानि, काशिकवस्त्रसच्चीवराणि प्रलम्बितानि, लोहितदण्डानि सुवर्णरूप्यपत्राणि अनेकानि पुष्पवृक्षशतानि। अनेकानि पुष्करिणीशतानि पुष्पपरिपूर्णानि परमशोभनीयानि प्रादुर्भूतानि।

अथ गगनगञ्जो बोधिसत्वो महासत्वो भगवन्त मेतदवोचत्—नागच्छति भगवन्नवलोकितेश्वरो बोधिसत्वो महासत्वः।

भगवानाह—एष कुलपुत्रः ततो वलेरसुरेन्द्रस्य भवनान्निष्क्रम्य परमभीषणीयं तमोऽन्धकारन्नाम पृथिवीप्रदेशं यत्र राक्षसानाम्भूमिम् अमनुष्यावचरमपृथिवीप्रदेशं तत्र गच्छति यत्र कुलपुत्र! चन्द्रादित्यौ न ज्ञायते तत्र च पृथिवीप्रदेशे वरदो नाम चिन्तामणिरत्नराजोऽस्ति स च तत्रावभासं कुरुते, अनेकानि यक्षराक्षसशतसहस्राणि तस्मिन् द्वीपे प्रतिवसति। यदावलोकितेश्वरो बोधिसत्वो महासत्वो प्रतिवसति, तदा दर्शनमात्रात्सर्व्वे यक्षराक्षसाः परमहृष्टतुष्टाः प्रमुदित-हृदया भवन्ति॥

अथ तेऽवलोकितेश्वरस्य पुरस्ताद्धावन्निधावन्ति, धावित्वा पादयोः प्रणिपत्य संभाषयन्ति, मा तु भगवन्! श्रान्त-क्लान्तो यस्त्वं चिरकालेन दृष्टः, यस्त्वमस्यां तमोऽन्धकारायां भूमौ विहरसि। स कथयति—अनेकानि, कर्त्तव्यानिमि। न च मयैकसत्वस्यार्थे आत्मभावः परिष्यादितः, अपितु सर्व्वसत्वाना मन्तिके मया महाकरुणा-चित्ततोत्पादयितव्या।

अथ ते सर्व्वे यक्षराक्षसा दिव्य-सुवर्ण-रत्नमयं सिंहासनं

प्रशमयन्ति तस्यावलोकितेश्वरस्यार्थे विचित्रैः पुण्यमयैः सञ्छादितं, यत्र च भगवान्निषद्य धर्म्मं देशयति। स तैर्यक्षराक्षसै र्नीत्वा तत्र दिव्य-सुवर्ण-रत्नमये सिंहासने विश्रामितः। तत अवलोकितेश्वरस्तेषां यक्षराक्षसानां धर्म्मन्देशयति—शृण्वन्तु भवन्त आर्य्यकारण्डव्यूहस्य महायानसूत्ररत्नराजस्य चतुष्पादिकामपि गाथां ये श्रोष्यन्ति श्रुत्वा च धारयिष्यन्ति पर्य्यवाप्स्यन्ति प्रवर्त्तयिष्यन्ति योऽनिशञ्च मनसि करिष्यन्ति तेषामिदं पुण्यस्कन्ध-सञ्चोदनी भविष्यति। तद्यथा अपि नाम कुलपुत्राः! शक्यम्मया परमाणुरजसां प्रमाण मुद्गृहीतुं, न तु कुलपुत्राः! शक्यम्मया कारण्डव्यूहस्य महायानसूत्ररत्नराजस्य पुण्यस्कन्धं गणयितुम्—तद्यथा अपि नाम कुलपुत्राः! शक्यम्मया महासमुद्रस्यैकमुदकबिन्दुं गणयितुं, न तु कुलपुत्राः! शक्यम्मया कारण्डव्यूहस्य महायानसूत्ररत्नराजस्य चतुष्पादिकाया अपि गाथायाः पुण्यस्कन्धं गणयितुम्—तद्यथा अपि नाम कुलपुत्राः! द्वादशगङ्गानदीवालकोपमास्तथागता अर्हन्तः सम्यक् सम्बुद्धा द्वादश कल्पानेकस्थाने धारयेयुः, चीवर-पिण्ड-पात्र-शयनासन-यानप्रत्यय-भैषज्य-परिष्कारैः पुष्प-धूप-गन्धमाल्य-विलेपन-चुर्ण-चीवर-छत्र-ध्वज-घण्टा-पताकाभिः तेपि-तथागताः सर्व्वे सहिता भूत्वा कारण्डव्यूहस्य महायानसूत्ररत्नराजस्य चतुष्पादिकाया अपि गाथायाः पुण्यस्कन्धं गणयितुं न शक्नुवन्ति स्म। प्रागेवाह मेकाकी तमोऽधकारभूमौ विहरामि॥

तद्यथा अपि नाम कुलपुत्राश्चतुर्म्महाद्वीपेष्वेकैकद्वीप-प्रमाणं गृहं विहारं वा कारयेद्दिव्य-सुवर्ण-रत्नमयं तत्र गृहे विहारे वा स्तूप-सहस्रं कुर्य्यात्, तेषां चैकदिने धात्ववरोपणंकुर्य्यात्



ভীত হইও না! তুমি কারণ্ডব্যূহ নামক মহাযান-সূত্র-রত্ন-রাজ শ্রবণ করিয়াছ; তোমার সুখাবতী লোক গমনের জন্য বিবিধ পথ সজ্জীকৃত হইয়াছে। সেই সুখাবতী লোক তোমার জন্য বিচিত্র ছত্র, সিংহাসন, দিব্য কুণ্ডল, মাল্য, প্রভৃতিতে সজ্জীকৃত হইয়াছে। মরণকালরূপ সময় শত্রুর নিকট হইতেই সুখাবতী গমন করিবে"। হে রত্নপাণে! বোধিসত্ত্ব অবলোকিতেশ্বর মহাসত্ত্ব তাহাদিগকে এই বিশেষ-রূপে পুণ্যফল প্রদর্শন করত নির্ব্বাণ ভূমি দেখাইলেন। সকল পাপমতি নিবারণের জন্য এবং যাহার পর নাই উৎকৃষ্ট পথে বোধিপথে প্রতিষ্ঠাপন করণার্থ অসুরগণকে নির্ব্বাণ পথ প্রদর্শন করাইলেন॥

অনন্তর মহাসত্ত্ব রত্নপাণি বোধিসত্ত্ব ভগবানের পাদদ্বয়ে শিরোবলুণ্ঠন পুরঃসর বন্দনা করত প্রস্থান করিলেন॥

## ইতি অসুরাশ্বাসন নামক নবম প্রকরণ॥

অনন্তর সর্ব্বণীবরণ বিষ্কম্ভী ভগবান্ কে বলিলেন—ভগবন্! অতিদুর্ল্লভ, এই অবলোকিতেশ্বরের কৃত কার্য্য সমস্ত এবং গুণবৃত্তান্ত সকল শ্রবণ করিতেছি।

ভগবান্ বলিলেন—কুলপুত্র! আরও শ্রবণ কর। যখন সেই বজ্রকুক্ষি হইতে নির্গত হইয়া কাঞ্চনময়ী ভূমিতে প্রবেশ করিলেন, তখনকার গুণবৃত্তান্ত শ্রবণ কর, তাহাও অতি-পূর্ব্ব কালের ঘটনা।

পূর্ব্ববর্ণিত ঘটনার কিছুদিন পরে পূজনীয় 'বিশ্বভূ' নামক তথাগত সম্যক্ জ্ঞানী হইয়া উঠিলেন। সেই সময়েও বিদ্যা-

स्वलित-पदं खलु गायति हसति विलापं कदाचि दातनुते
स्निग्धां ग्रथति वयस्यां मूर्च्छत्यपि गीत-मूर्च्छाभिः ॥३१८

विन्दति भवत्-कथायां कुसुमायुध-पीड़नं किमपि ॥
तेन प्रतिपद मवला तनु भङ्गं जृम्भया तनुते ॥३१९

त्वद्-गुण-गण-परिपूर्णं श्रुति विवरे सा मुहुर्मुग्धा ॥
न्यस्यति साङ्गुलि दण्डं तदगाधत्वं परीक्षमाणेव ॥३२०

अति मधुरे तव चतुरा कथारसे किमपि कटु वाच्यः ॥
पानक इव मरिचं तद्रसनिष्कृतये विमिश्रयति ॥३२१

अति पाण्डुतां वहन्ती न लक्ष्यते सा स्फटिक-हर्म्येषु ॥
कामस्तु दिव्य-दृष्ट्या प्रहरति तां निपुण मालोक्य ॥३२२

पाटीर-पङ्क-पूरं वक्षसि विदधाति हन्त ! सन्तप्ता ॥
अन्तर्निहितेन भवत् भवति निशीत्ताप-संश्लेषः ॥३२३

मलयानिलोपतप्ता भुजगीरिव पवन-भोजना बहुशः ॥
असकृन्मृदु-तनु-वल्ली मृदुल-मृणाली हृदि क्षिपति ॥३२४

सह जीवनेन स हृदय-चौरो न वहिः समायात् ॥
इति कुच-गो-पुर-मध्ये कुरुते गलदम्बु-पिच्छिलां शरणिम् ॥३२५

इत्य माकर्णयन् रागात्तदैव चल-मानसः। प्रयाणं प्रेयसी-हेतोश्चक्रे चक्र-धरोपमः ॥३२६
ककुत्स्थ-सचिवै रस्य सपर्य्यार्थं समागतैः। पुरस्कृत स्ततः प्रायात्सोऽचिरेण पुरान्तिकम् ॥३२७
पूरदन् पर-वीथ्यन्तर्नभो रविरिव त्विषा। चन्द्रवत्पौरयन्नारी-दृक्-चकोरीर्मुखश्रिया ।३२८
श्रियं सर्व-जनोत्कृष्टां श्रीवत्साङ्कइवोद्वहन्। पद्मा-सदन-दृग्-दानैस्तर्पयन्दर्शनार्थिनः ॥३२९
नगरान्तं समभ्येत्य वसुना नृप-सूनुना ॥ स प्राप्तः पौर-दृष्टीनां महोत्सव इवापरः ॥३३०
तं परिष्वज्य विनयायेनान्तर्द्वार मागतम् ॥ ककुत्स्थः स्वयमादाय तन्निनाय निवेशनम् ॥३३१
तदर्थं मनुकल्पितं मधुर-भक्ष-पानान्वितम्। विचित्र-मणि-मन्दिरं वितत-मन्दुरा सुन्दरम्।३३२
स्फुरत्प्रमद-काननं विलसदिष्ट-दन्ति-स्थलं। पुरन्दर-पुरोपम स्तुरवर स्तमावेशयत् ।३३३
निवेश्य खलु तत्र तन्नरपतौ गते मन्दिरश्चिराय, परिचिन्तित-प्रियजनाननालोकने।
निशैव परिपन्थिनीति च विचार्य तद्यापने, विचित्र कलयान्वितां व्यवमितिश्चकारागमकृत् ॥३



यत्र तेषां धात्वावरोपणेषु पूजायां पुण्यस्कन्धं ततो बहुतरं कारण्ड-व्यूहस्य महायान-सूत्र-रत्न-राजस्य चतुष्पादिकाया अपि गाथाया पुण्यस्कन्धं॥ तद्यथा अपि नाम कुलपुत्राः पञ्चमहानद्यो सहस्र नदी-परिवारा महासमुद्र मुपसङ्क्रामन्ति। एवमेव कुलपुत्रा अस्य कारण्डव्यूह-महायान-सूत्र-रत्न-राजस्य चतुष्पादिकामपि गाथां शृण्वतां पुण्यौघ-प्रवाह मुपप्रवहसि ॥

अथ ते यक्षराक्षसा अवलोकितेश्वरं एतदवोचत्—ये सत्त्वाः कारण्डव्यूहं महायान-सूत्र-रत्न-राजं लिखापयिष्यन्ति तेषां कीदृशं पुण्यस्कन्धं भवति ?

स आह—अप्रमेयं तेषां कुलपुत्राः ! पुण्यस्कन्धं प्रभवति। ये कारण्डव्यूहं महायान-सूत्र-रत्न-राजं लिखापयन्ति तैश्चतुराशीति धर्म्मस्कन्ध सहस्राणि लिखापितानि भवन्ति। ते राजानो भवन्ति, चक्रवर्त्तिन श्चतुर्द्वीपेश्वरा भवन्ति, ते सहस्रं पुत्राणां शूराणां वीराणां वीराङ्गरूपिणा म्परसैन्य-प्रमर्द्दकानां जनयन्ति। ये सतत-परिग्रहं कारण्डव्यूहस्य महायान-सूत्र-रत्न-राजस्य नाम मनुस्मरन्ति—मुच्यन्ते ते ईदृशात्संसारिकाद्दुःखात् जाति-जरा-व्याधि-मरण-शोक-परिदेवना-दुःख-दौर्म्मनस्योपायास-परिमुक्ता भवन्ति। यत्र यत्रोपपद्यन्ते तत्र तत्र जातौ जातौ जातिस्मरा भवन्ति। तेषां च कायात् गोशीर्ष-चन्दन-गन्धो वास्यति। नीलोत्पल-गन्धिनो मुखा भवन्ति। परिपूर्ण-गात्राश्च भवन्ति। महामग्ना अपरिमाण-पुण्य-बल-समन्वागताश्च ते सत्पुरुषा भविष्यन्ति, न कदाचित् यक्षत्वं न राक्षसत्वन्न प्रेतत्वं न पिशाचत्वन्न पुतनात्वं न कटपूतनात्वन्न मनुष्य-दारिद्र्यं प्रत्यनुभविष्यन्ति। गङ्गा-नदी-वालुका-समानां बुद्धानां भगवतां सेवा-पुण्यस्कन्धेन सम-

न्वागता भविष्यन्ति। येऽपि केचित् कुलपुत्रास्सत्वा अस्मात्
कारण्डव्यूह-महायान-सूत्र-रत्न-राजा देकाचर मपि नामधेय
मपि चतुष्पादिकामपि गाथां लिखापयिष्यन्ति तेषां पञ्च.नन्त-
र्य्याणि कर्म्माणि निरवशेषं परिच्चयं गमिष्यन्ति। ते चाभिरूपा
भविष्यन्ति। प्रासादिका भविष्यन्ति। दर्शनीयाश्च भविष्यन्ति।
बहुजनप्रियमना पाददर्शनेन च भविष्यन्ति। तेषां न कश्चित्
काये व्याधिः प्रभविर्ष्यति। न चक्षुरोगं न श्रोत्ररोगं न घ्राणरोगं
न जिह्वारोगं न कायरागं नहीनाङ्गानि भविष्यन्ति न प्रत्यन्ति
केषु जनपदेषु प्रत्याजायन्ते। न म्लेच्छेषु न पापकुलेषु नोर-
त्रिकेषु न कौकुटिकेषु न जतेग्रषु प्रतग्राजायन्ते। सुपरि-शुद्ध-
कायाश्च ते सत्पुरुषा भविष्यन्ति॥

अथार्य्यावलोकितेश्वरो बोधिसत्वो महासत्व एवं तेषां यक्ष-
राक्षसानां तमोन्धकारवासिनां सर्व्वेषां चानुलोमिकां धर्म्मदेशनां
कृतवान्। ते यक्षराक्षसास्तान्ते धर्म्मदेशनां शुभां श्रुत्वा केचित-
श्रोत आपत्तिफले प्रतिष्ठिताः। केचित् सकृदागामिफले केचि-
दनागमफले केचिदर्हत्त्वे केचित् प्रभुत्वबोधौ प्रतिष्ठिताः॥

अते। येनार्य्यावलोकितेश्वरो बोधिसत्वो महासत्वः तेनोपसं
क्रम्य पादयोः प्रणिपत्य एवं कथयन्ति। इहैव भगवन्! विहरस्व
मान्यत्र स्थाने क्वचिद्गच्छ, वयं ते उपस्थान-परिचर्य्यां करिष्यामो वयं
च तवान्तिके अस्मिन्नेव तमोऽन्धकारभूमौ तवार्थाय दिव्यानि सौवर्ण-
मयानि चंक्रमणानि करिष्यामः। मा भगवन्नन्यत्र प्रदेशं गच्छस्व
वयं तवादर्शनात् कथं तिष्ठामः। अथार्य्यावलोकितेश्वरो बोधि-
सत्वो महासत्वस्तांश्च यक्षराक्षसानेतदवोचत्। अनेकानि च मया
कुलपुत्राः सत्वानि बोधिमार्गे नियोजयितव्यानि। अथ ते सर्व्वे



यक्ष-राक्षसाः करे कपोलं दत्वा चिन्तापरा व्यवस्थिताः। ते परस्प
रमेव माहुर्गमिष्यति अयमस्माक मवलोकितेश्वरो बोधिसत्वो
महासत्वो ऽन्यतरं पृथिवीप्रदेशं तद्वयं धर्म्म-सांकथ्य-विप्रहीणा
भविष्यामः किमस्माभिः कर्त्तव्यम्। अथार्य्यावलोकितेश्वरो बोधि-
सत्वो महासत्वस्तस्यास्तमोन्धकाराया भूम्याः संप्रस्थितः अथ ते तमो-
न्धकार-प्रतिवासिनो यक्ष-राक्षसास्तस्य भगवतोऽ वलोकितेश्व-
रस्य बोधिसत्वस्य महासत्वस्य पृष्ठतः पृष्ठतः समनुवद्धा
गच्छन्ति स्म॥ अथा वलोकितेश्वरो बोधिसत्वो महासत्वस्तान्
तदवोचत् प्रति निवर्त्तयध्वं दूरतमेव माह॥

ते यक्ष-राक्षसाः पादौ शिरसा वन्दित्वा त्रिः प्रदक्षिणी कृत्य
तत्रैव च प्रक्रान्ताः॥

## ॥ इति यक्षादि-समाश्वासनं नाम द्वादश प्रकरणम्॥

---

अथार्य्यावलोकितेश्वरो ज्वलदिवाग्नि-पिण्ड माकाशेऽन्त-
र्हितः॥ ततो देव-भवनं गत्वा शुद्धावास-कायिक-देव-पुत्राणां
सकाश मुपसंक्रान्त उपसंक्रम्य ब्राह्मणरूपमात्मानमभि निर्म्माया
गमत्। तत्र देवनिकायेषु सुकुण्डलो नाम देवपुत्रो दरिद्रो दुश्चि-
त्तश्चेति। अथार्य्यावलोकितेश्वरः स तेन ब्राह्मणरूपेण तस्य देव-
पुत्रस्य सकाश मुपसंक्रान्त उपसंक्रम्य सर्व्वेषां देवानां दारिद्र्य-
दुःख-व्यूपसमाये तं देवपुत्र मेतदवोचत्। बुभुक्षितोहं तृषित
श्चेति। अथ स देवपुत्रो रुदं स्तं ब्राह्मण मेतदवोचत्। न च मे
ब्राह्मण! किञ्चित्सं विद्यते। ब्राह्मण अवोचत्। अवश्यं त्वया मम
किञ्चिद्दातव्यम्। अथ स देवपुत्रो विमानं प्रविश्य म—

निरभ्यवेक्षितु मारब्धः । स च परिपतितं निवेशनं दिव्यै र्महार्हैरत्नभाण्डैः परिपुर्णं दक्षिणपार्श्वं अन्यानि च भाण्डानि दिव्यरसरसाग्रोपेतैराहारैः परिपूर्णानि वामपार्श्वे विमानस्य वस्त्राभरणैः सर्व्व पुष्प-गन्धादिभिः परिपूर्णानि ॥

अथ स देवपुत्र एतद्दृष्ट्वैवं चिन्तामापेदे ॥ अवश्य मयं स सत्पात्रो द्वारे स्थितो यस्य दर्शनमात्रेणापीदृशी लक्ष्मीर्ममानुप्राप्ता ॥

अथ स देवपुत्र स्तं ब्राह्मण माहूयैव माह—एहि ब्राह्मण! इदं विमानं प्रविश स च ब्राह्मण स्तेन देवपुत्रेण विमाणे प्रविश्य तैर्द्दिव्यरत्नैः प्रतिपादितः ॥

दिव्यै रसरसाग्रोपेतै राहारै र्भोजितः, दिवैर्वस्त्रैः प्रावारितः स भुक्त्वा च स्वस्तिकार मनुकुरुते । अथ स देवपुत्र स्तं ब्राह्मण मेत दवोचत् । भो! ब्राह्मण! कतमायाभूम्या स्त्वमागतः? ब्राह्मण आह—जेतवन नाम महाविहारादह मागतः । अथ स देवपुत्र स्तमेत दवोचत् । कीदृशी सा भूमिः ? अथ स ब्राह्मणो देवपुत्र मेत दवोचत् । तथागताध्युषिता सा भूमी रमणीया दिव्य-मणि-रत्न-परिखचिता परिशोभिता परिभागाय च तद्भूमौ दिव्य-कल्प-वृक्षाः प्रादुर्भूता मनोरमाणि पुष्पाणि प्रादुर्भवन्ति विविधा पुष्करिण्यो दृश्यन्ते विविधाश्च शीलवन्तो गुणवन्तो दक्षिणीया दृश्यन्ते विश्वभुवस्तथागतस्यानेकानि प्रातिहार्य्याणि दृश्यन्ते । एवं सा परमरमणीया देवपुत्रभूमिः । अथ स देवपुत्र स्तं ब्राह्मण मेत दवोचत्—अवश्यं त्वया ब्राह्मणसत्वम्प्रत्याहारः कर्त्तव्यः । अथवा त्वं देवोसि मनुष्योसि वा न च मानुषस्यादृश न्निमित्तम्भवति यादृश स्तव निमित्तं भवति ।



अथ स ब्राह्मण स्तमेत दवोचत्—न देवोऽपितु मानुषोहं बोधिसत्वभूत एवं हीनदीनानुकम्पको बोधिसर्गं सुपदर्शकः ॥ अथ स देवपुत्र स्तस्मै मौली-कुण्डल मुपनामयति, उपनामयित्वा च स देवपुत्र इमां गाथां भाषितः—

"अहो! गुणमयं क्षत्रं सर्व्व-दोष-विवर्ज्जितम् ।
अद्यैव वापितं वीजं अद्यैव फल-सम्पदम् ॥"

अथ स देवपुत्र इमां गाथाम्भाषित्वा तत्रैव प्रक्रान्तः ॥

## ॥ इति देवभवन भ्रमणं नाम त्रयोदश प्रकरणम् ॥

---

अथ स ब्राह्मणः तस्माद्देवनिकाया दवतीर्य्य सिंहलद्वीपं प्रत्युद्गतो गत्वा च राक्षसीनां पुरतो व्यवस्थितः । कामरूप मात्मान मभिनिर्म्माय प्रासादिकम् । अथ ता राक्षस्योऽन्योऽन्यमेवमाहुः—अय मीदृशः परम-कामरूपो पुरुषो दृश्यते । अथ तं दृष्ट्वा च तदा तासां राक्षसीनां कामचित्त मुत्पन्नं ! तदा तस्य सकाश मुत्पसंक्रम्यैत दवोचत् । भवांस्त्वं भजस्व अस्माकं कुमारी-यौवनं, न चास्माकं स्वामी संविद्यते त्वं च भो पुरुष! अस्वामिकानां स्वामी भव । अगतिकानां गतिर्भव । अपरायणानांम्परायणो भव । अत्राणानां त्राणं भव अद्वीपानां द्वीपो भव । अन्धानामालोको भव । इमानि तेऽन्नगृहाणि पानगृहाणि वस्त्रगृहाणि विविधानि विचित्राणि शयनानि उद्यान-रमणीयानि पुष्किरिणीयाणि ॥

स कथयति—मदीय माज्ञम् यदि कुरुत तत्सर्व्वं युष्माकं यथाभिप्रायं करिष्यामि । ताश्च तमाहुः । कथं अयं तवाज्ञां न करि-

ष्यामः ? तेन तासामार्य्याष्टाङ्गिकमार्गं मुपदर्शितं। दश कुशलानि कर्म्मपथान्युपदर्शितानि । आगमचतुष्टयञ्चाधीतं । अथ ता राक्षसास्तस्य पुरुषस्यान्तिका दार्य्याष्टाङ्गिकमार्गं गृहीत्वा, दश कुशलानि च संस्मर्य्य, सत्यचतुष्टयं प्राप्ता, आगम-सत्य-चतुष्टयाधीताः, काश्चिच्छ्रोतापत्तिफल मनुप्राप्ताः सकृदागामिफलं चानुप्राप्ताः, अनागामि फलञ्चानुप्राप्ता । यावत् काचिदर्हत्त्वं काचित् प्रत्यक् बोधि मनुप्राप्ता स्तदा तासां राक्षसीनां राग-दुःखन्न वाध्यते । द्वेष-दुःखं न वाध्यते । मोह-दुःखं न वाध्यते । अघातचित्तन्न भवति । न च कस्यचिज्जीवितान्तरायं कुर्व्वन्ति । अभिरता धर्म्मेषु व्यवस्थिताः शिक्षा सम्बर मुपगृहीता एवं चाहुः पुनरपि न प्राणातिपातं कुर्व्वामः । यादृशेन जाम्बुद्वीपका मनुष्या जीवन्ति । अन्नेन पानेन तादृश-जीविकया वयं जीवामः । पुनरपि राक्षसी-वृत्तिन्न कुर्व्वामः । उपासक-सम्बरं धारयिष्याम इति । तादृशं शिक्षा-सम्बर मुपगृहीत्वा तस्यैव पुरुषस्य पुरतो निमिषैर्नयनैः प्रेक्ष्यमाणाः प्रस्थिताः ॥

॥ इति सिंहलभ्रमणं नाम चतुर्द्दश प्रकरणम् ॥

---

अथार्य्यावलोकितेश्वरो बोधिसत्वो महासत्व स्तस्मात्सिंहलद्वीपा दवतीर्य्य वाराणस्यां महानगर्य्यां मुत्चार-प्रश्राव-स्थाने गता, यत्रानेकान्यनेकानि कृमिकुलशतसहस्राणि प्रतिवसन्ति। ततोवलोकितेश्वरो बोधिसत्वो महासत्व उपसंक्रम्य तत्रासतानि प्राणिशतसहस्राणि दृष्ट्वा आत्मानं भ्रमररूपमभिनिर्म्माय घुणघुणायमाणं तदेषां शब्दंनिश्चारयति । नमो बुद्धाय नमो धर्म्माय नमः सङ्घाय



इति ॥ तच्छ्रुत्वा ते च सर्व्वे प्राणका नमो बुद्धाय नमो धर्म्माय नमः संघायेति नाम मनुस्मारयन्ति । ते च सर्वे बुद्धनाम-स्मरण मात्रेण विंशति-शिखर-समुद्गतं सत्काय-दृष्टि-शैलं ज्ञात्वा ज्ञानवज्रेण भित्वा सर्व्वे ते सुखावत्यां लोक धाता वुपपन्नाः सुगन्धमुखा नाम बोधिसत्वा बभूवुः । सर्वे ते भगवतो ऽमिताभस्य तथागतस्यान्तिकादिदं कारण्डव्यूहं नाम महायानं श्रुत्वा अनुमोद्य च नानादिग्भ्यो व्याकरणानि प्रतिलब्धानि ॥

अथार्य्यावलोकितेश्वरो बोधिसत्वो महासत्वो यदा सत्व-परिपाकं कृत्वा तस्या वाराणस्या महानगर्य्याः प्रकान्तः ॥

॥ इति वाराणसी-भ्रमणं नाम पञ्चदश प्रकरणम् ॥

---

तदा स मगधाभिमुखं प्रत्युद्गच्छति । स मगध-विषय मनुप्राप्तः । यावतः सत्वान् पश्यन्ति स्म । परस्परम्मांस-भक्षणं कुर्व्वाणान् अथार्य्यावलोकितेश्वरो बोधिसत्वो महासत्वस्तानेव माह—कस्माद्भोः ! यूयं अन्योन्यं मांसं भक्षयथ ? ते चाहुः—नाद्यैव मांसभक्षणं विंशति वर्षाणि परिपुर्णानि कांतारस्य च प्रतिपन्नस्य च । नात्र किञ्चि दन्नपानं संविद्यते तस्माद्वयं अन्योन्यं विरोधं कुर्व्वाणा जीविताः । एवं कृत्वा मांस-भक्षणं कुर्वामः ॥

अथावलोकितेश्वरो बोधिसत्व श्चिन्ता मापेदे—केनोपायेनाहं सत्वान् सर्वान् सुखोपधानै स्तस्मात् कान्तारात्महादारुणादकालमरणात् परिमोचयेयं सन्तर्पयेयम् ॥

अथावलोकितेश्वरो विविधानि वर्षाणि प्रवर्षितुमारब्धः ॥

प्रथम मुदकवर्षं, यदा उदकेन संतर्पिताः प्रीणितगात्राश्च भवन्ति तदा पश्चाद्दिव्यानि पिष्टकानि रसरसाग्रोपेतानि तैलाहारेण परिपूर्णानि । यदाहारेण सन्तर्पिता भवन्ति तदा धान्यवर्षाणि पतन्ति अन्यानि च तिल-तण्डुल कोल-मुद्ग माषा-कलाव-मसुर-यव-गोधूम-शालि-धान्य-कुलत्थादीन् पतन्ति-स्म । विविधानि च वस्त्राभरणानि च प्रवर्षन्ति स्म । यदा यथा तेषां सर्वेषां सत्वानां कोऽप्यभिप्राया भवन्ति तदा तथा तेषां सत्वानामभिप्राया अनुसिध्यन्ते । अथ ते मागधकाः सत्वाः स्तदिदं विचित्रं स्वात्मसुखं दृष्ट्वा दुःखं च व्युपशान्तं, तदा परमविस्मयमापन्ना स्ते च सर्व्वे एक स्थाने विश्रान्ताः, विश्रमित्वा परस्परमेवमाहुः—कस्य देवस्यायं प्रभावः ? ततस्तेषां पुरुषाणां मध्ये-जीर्णोवृद्धो महल्लकः कुब्जो गोपाणसीव क्रोधि भग्नो दण्डपरायणः अनेकवर्षशतसहस्रायुषिकः । स तेषां मध्ये स्थित्वा कथयति—न युष्माकमन्यदेवस्य कस्य चिदीदृशं प्रभावो भवति विरहिता देवलोकितेश्वरस्य । ततस्ता पर्षदः पृच्छन्ति । कीदृशं तस्य निमित्त मवलोकितेश्वरस्य ? अथ स पुरुष आर्य्यावलोकितेश्वरस्य गुणोद्भावनामभाषितु मारब्धः—

शृणुत कुलपुत्राः ! अवलोकितेश्वरो बोधिसत्वो महासत्वोऽन्धभूतानान्दीपभूतः, सूर्य्य-ताप-दग्धानां छत्रीभूतः तृषोपद्रुतानां नदीभूतो, भय-भीताना मभयन्ददः, व्याधिपरिपीड़ितानां वैद्यभूतः, दुःखितानां सत्वानां मातापितृभूतः, अवीचुपपन्नानां सत्वानां निर्व्वाण-प्रदर्शकः । ईदृशानि भवतस्तस्य गुणविशेषानि । सुखितास्ते सत्वा लोके ये तस्य नाम मनुस्मरन्ति । ते आपश्चिमं सांसारिकन्दुःखं परिवर्ज्जयन्ति । सचेतनास्ते पुरुषपुङ्गवा ये



সেই যক্ষ গুহার মধ্যেই পঞ্চ পাণ্ডব প্রভৃতিও ছিলেন, সেই ক্ষত্রিয়গণের বক্ষে শিলার্পণ পূর্ব্বক শৃঙ্খলা দ্বারা হস্ত পদ সকল আবদ্ধ করিয়া রাখা হইয়াছিল। তখন মদীয় সেই কারাগারের সমস্ত দ্বারই দৃঢ়রূপে আবদ্ধ ছিল। সেই কারাগৃহের সপ্ত দ্বার ছিল—প্রথম দ্বার কাষ্ঠময়, দ্বিতীয় দ্বার খদিরময়, তৃতীয় দ্বার লৌহময়, চতুর্থ দ্বার তাম্রময়, পঞ্চম দ্বার রৌপ্যময়, ষষ্ঠ দ্বার সুবর্ণময়, সপ্তম দ্বার রত্নময়। এই সপ্ত দ্বারের প্রত্যেক দ্বারেই পঞ্চ পঞ্চশত কপাট যন্ত্রে নিযন্ত্রিত ছিল। সেই সুবর্ণময় দ্বারে উপর্য্যুপরিভাবে সাতটি পর্ব্বত সংস্থাপিত ছিল, এইরূপ প্রতি দ্বারেই উপর্য্যুপরি পর্ব্বতবৃন্দ সর্জ্জীকৃত থাকিত। তদনন্তর আমি দশরথ-পুত্রের অন্বেষণে প্রবৃত্ত হইলাম, কখন মক্ষিকারূপে, কোন দিবস ভ্রমররূপে, কোন দিবস বরাহরূপে, কোন দিবস বা মনুষ্য রূপেই—এইরূপ দিন দিন মৃগ পক্ষ্যাদি নানাবিধ জন্তুরূপে অন্বেষণ করি কিন্তু একমাত্র তাঁহাকে কোন রূপে দেখিতে পাই না; অবশেষে তদ্বিষয়ে হতোদ্যম হইয়া শক্র নিঃশেষ হইল না জানিতে পারিয়াও যজ্ঞ প্রারম্ভ করিলাম, যজ্ঞকার্য্যে আবদ্ধ হইলাম।

সেই সময়ে অবতার বলিয়া প্রসিদ্ধ দশরথ-পুত্র এই স্থলে আগমন করেন, তিনি মৎ কারাগৃহের দ্বারে স্থাপিত সপ্ত পর্ব্বতই উৎপাটন করেন, উৎপাটন করিয়া সামান্য লঘু বস্তুর ন্যায় অন্যান্য প্রদেশে ছুড়িয়া ফেলিতে লাগিলেন এবং উচ্চৈঃশব্দে সেই শৃঙ্খলাবদ্ধ ক্ষত্রিয়গণকে আশ্বাস প্রদান করিতে লাগিলেন। যুধিষ্ঠির, সহদেব, ভীমসেন,

गत्वा ततः पुरहरस्य पुरं पितास्य पौष्पी नृपः पुरहरन्तपसा प्रसाद्य ॥
लब्ध्वा स्व-सिद्धि-विभवं परिमुक्त-बन्धः श्रीमानमोद मदनान्तक-पार्श्व-संस्थः ॥३८२

श्रीलश्रीरघुनाथ-देव-शिवदा-देव्योस्तनूसम्भवः ॥
शम्भोर्भक्ति-मृणाल-शक्तिरमलः श्रीराजहंसोत्तमः।
पौराण्या नव-चन्द्रमौलि-कथया श्रीरामनाथः स्वयं,
चम्पूं गुम्फितवांस्तदीय कथया जातो विवाहोत्सवः ॥५

## इति विवाहोत्सवो नाम चतुर्थोच्छ्वासः ॥४॥

———०-:-०———

अथ मधुश्रिय मीक्षितु मादरात्प्रिय जनेन समन्नगरोदरात् ॥
उपवनं प्रियया प्रमदागणैर्म्महितया हितया नृपतिर्ययौ ॥१

मणिपरिच्छदचित्रतरांवरावृतहिरण्मययानगणेन ताः॥
सदयि दह्यिता दनुसंययुः सुनयना नयनाति समीपगाः ॥२

नगरतोऽनतिदुरमुपेत्यताः सह नृपेण नृपप्रियया तया ॥
ददृशु रम्बुज चारु विलोचनाः श्रितमदाः प्रमदाः प्रमदाटवीम् ॥३

नव-मधु-प्रियया प्रिययानया रति-रुचिं श्रितया प्रियया ऽनया ॥
अप्रतिमोऽवनिपोषण-विग्रहो ग्रहपति-प्रतिमो बभौ ॥४

मधु-भरानत-माधविका लता मधुमदोन्मद षट्-पद सम्पदम् ॥
नभसि सध्वनि सध्वनि भूपतिर्दृशि चरार चलाचल घन-श्रियं ॥५

अहि-भुजङ्गमखेलनं क चक पोत कपोत-कुला कुलम् ॥
मसृण-खड्गक-खड्गक वाजकं क्रौञ्च कुरङ्ग-कुलङ्गत माश्वसम् ॥६



अवलोकितेश्वरस्य सततं परिग्रहं पुष्प-धूप निर्य्यातयन्ति। येऽवलोकितेश्वरस्य पुरतश्चतुरस्रं मण्डलकं कुर्व्वन्ति ते राजानो भवन्ति चक्रवर्त्तिनः सप्तरत्न-समन्वागताः॥ तद्यथा—चक्ररत्नं अश्वरत्नं हस्तिरत्नं मणिरत्नं स्त्रीरत्नं गृहपतिरत्नं परिणायकरत्नं एवं सप्त रत्नानि, एभिस्सप्तरत्नैः समन्वागता भवन्ति। ये चावलोकितेश्वरस्यैकमपि पुष्पं निर्य्यातयन्ति ते सुगन्धिकाया भवन्ति। यत्र यत्रोपपद्यन्ते तत्र तत्र परिपूर्णकायाश्च भवन्ति। एवं सत्पुरुषो गुणविशेषं कृतवान्। ताश्च पर्षदः स्वकस्वकेषु भवनेषु प्रत्युद्गताः अनन्त-विमला नाम कायपरिशुद्धिः प्रतिलभतेस्म। अथ स जीर्ण-पुरुषः आनुलोमिकीन्धर्म्मदेशनां कृत्वा स्वकं गृहं निवेशनं प्रत्युद्गतः॥ अथावलोकितेश्वरस्तत्रैवाकाशेऽन्तर्हितः॥

अथ स आकाशे चिन्तामापेदे॥ विश्वभूस्तथागतो मे चिरकालं दृष्टः सोऽनुपूर्व्वेण जेतवनं विहार मनु प्रविष्टः॥ यावत् पश्यति अनेकानि देव-नाग-यक्ष-गन्धर्वा-ऽसुर-गरुड़-किन्नर-महोरग-मनुष्यामनुष्य-शतसहस्राणि। अनेकानि च बोधिसत्त्वशतसहस्राणि सन्निपतितानि॥

अथ गगणगञ्जो बोधिसत्वो भगवन्त मेतद वोचत्। कतमोऽयं भगवन्! बोधिसत्व आगच्छति?

भगगवानाह—एष कुलपुत्रावलोकितेश्वरो बोधिसत्वो महासत्व आगच्छति॥

अथ गगणगञ्जो बोधिसत्वः तूष्णींभावेन व्यवस्थितः। अथावलोकितेश्वरो बोधिसत्वस्तं भगवन्तं त्रिःप्रदक्षिणीकृत्य तामपार्श्वे विश्रान्तः॥

अथ स पुनः श्रान्तं विदित्वा भगवान् पृच्छति—श्रान्तस्त्वं

कुलपुत्र ! कीदृशो कर्म्मभूमिस्त्वया निष्पादिता ? तेन तस्य भूतपूर्व्वं वर्णितं—सदा प्रेतेष्ववीचुपपन्नेषु कालसूत्र-रौरवोपपन्नेषु दाहे तपने महानरके, सितोदके महानरके, असिच्छेदे महानरके, सम्बरे महानरके। एषु महानरकेषु ये सत्वा उपपन्ना स्तेषां च कर्म्मभूमिः सत्वाना मपरिपाककृता कर्त्तव्याः कृत्वा चानुत्तरायां सम्यक् संबोधौ प्रतिष्ठापयितव्याः। ईदृशो मया सत्वपरिपाकः कृतः॥

अथ गगणगञ्जो बोधिसत्वो महासत्वः परमविस्मयमापन्नः। न च मे बोधिसत्वभूतस्य ईदृशं विषयं दृष्टं श्रुतं वा, तथागताना मीदृशं विषयं न संविद्यते॥

अथ गगणगञ्जो बोधिसत्वो ऽवलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य पुरतः स्थित्वा अवलोकितेश्वर मेव माह—मा त्वं श्रान्तः क्लिष्टस्त्वं।

स आह—न चाहं युष्माकं मध्ये श्रान्तो न क्लिष्टः॥ तौ परस्परं सांकथ्यं कृत्वा तूष्णींभावेन व्यवस्थितः॥

अथ भगवान् षट्पारमितानिर्द्देशन्धर्म्मन्देशयितु मारब्धः। शृण्वन्तु कुलपुत्राः ! प्रथमं बोधिसत्वभूतेन दानपारमिता परिपूरयितव्या (१)। एवं शीलपारमिता (२) क्षान्तिपारमिता (३) धैर्य्यपारमिता (४) ध्यानपारमिता (५)। प्रज्ञापारमिता (६) परिपूरयितव्या। इमां चानुलोमिकान्धर्म्मदेशनां कृत्वा तूष्णींभावेन व्यवस्थितः। अथ ताः पर्षदः स्वकस्वकस्थानेषु प्रक्रान्ताः ते च बोधिसत्वाः स्वकस्वकेषु बुद्धक्षेत्रेषु प्रक्रान्ताः॥

इयं कारण्डव्यूह महायान सूत्र-रत्न-राजस्य प्रथमो निर्व्यूहः सर्व्व-कर्म्म-विशोधनोऽनुत्तर-बोधिमार्ग प्रतिष्ठापकः समाप्तः॥ १॥



अथ सर्व्वनीवरणविष्कम्भी भगवन्त मेत दवोचत्—आख्याहि भगवन्नवलोकितेश्वरस्य भूतपूर्व्वं कृत मेते समाधयः, यैरवलोकितेश्वरः समापन्नाः।

भगवानाह—अप्रमेयै रसंख्यायैः समाधिकोटिनियुतशत सहस्रैः समापन्नोऽवलोकितेश्वरः; येषां समाधीनां शक्यं सर्व्वतथागतैः पर्य्यन्त मधिगन्तुम्।

अथ सर्व्वनीवरणविष्कम्भी आह—निर्द्दिशय भगवं स्तानि समाधीनि सर्व्वसत्वानुकम्पया।

भगवानाह—तद्यथापि नाम कुलपुत्र! आकारकरो नाम समाधिः, प्रभाकरो नाम समाधिः, वज्रोद्गतो नाम समाधिः सूर्य्यप्रभो नाम समाधिः, विकिरिणो नाम समाधिः, केयूरो नाम समाधिः, ध्वजाग्रो नाम समाधिः, अलङ्कारो नाम समाधिः, व्यूहराजो नाम समाधिः, दशदिग्वावलोकनो नाम समाधिः, चिन्तामणि-वर-लोचनो नाम समाधिः, धर्म्मधरो नाम समाधिः, समुद्रावरोहणो नाम समाधिः, सुप्रतिष्ठितो नाम समाधिः, वज्रध्वजो नाम समाधिः, सर्व्वलोकधातुव्यवलोकनो नाम समाधिः, कृत्स्नगतो नाम समाधिः, आभिनमितो नाम समाधिः, उष्णीषकुण्डलो नाम समाधिः, चन्द्रवरलोचनो नाम समाधिः, बहुजनपरिवारो नाम समाधिः, देवकुण्डलरोचनो नाम समाधिः, कल्पद्रोणो नाम समाधिः, प्रातिहार्य्यसंदर्शनो नाम समाधिः, पद्मोत्तमो नाम समाधिः, अवीचि-संशोषणो नाम समाधिः, रुचिरो नाम समाधिः, देवमण्डलो नाम समाधिः, अमृतबिन्दुर्नाम समाधिः, प्रभामण्डलो नाम समाधिः, समुद्रावगाहनो नाम समाधिः विमाननिर्व्यूहो नाम समाधिः,

कलविंकस्वरो नाम समाधिः, नीलोत्पलगन्धो नाम समाधिः, आरूढो नाम समाधिः, वज्राङ्कुशो नाम समाधिः, द्विरदरतो नाम समाधिः, सिंहविक्रीड़ितो नाम समाधिः, अनुत्तरो नाम समाधिः, दमनो नाम समाधिः, चन्द्रोत्तरो नाम समाधिः, आभासकरो नाम समाधिः, शतकिरणो नाम समाधिः, विच्छुरितो नाम समाधिः, प्रभाकरो नाम समाधिः, स्वाकारकरो नाम समाधिः, असुरसंचोदनो नाम समाधिः, भवसंशोधनो नाम समाधिः, निर्वाणसंचोदनो नाम समाधिः, महाद्वीपो नाम समाधिः, द्वीपराजो नाम समाधिः, भवोत्तारकरो नाम समाधिः, अन्तकरो नाम समाधिः, देवाभिमुखो नाम समाधिः, योगकरो नाम समाधिः, परमार्थदर्शनो नाम समाधिः, विद्युन्नाम समाधिः, नामव्यूहो नाम समाधिः, सिंहविजृम्भितो नाम समाधिः, स्वातिमुखो नाम समाधिः, आगमनागमनो नाम समाधिः, बुद्धिविस्फुरणो नाम समाधिः, स्मृतीन्द्रियसंवर्द्धनो नाम समाधिः, अधिमुक्तो नाम समाधिः, जयवाहनो नाम समाधिः, मार्गसन्दर्शनो नाम समाधिः ॥ एभिः कुलपुत्रावलोकितेश्वरो बोधिसत्त्वो महासत्त्वः समाधिभिः समन्वागतो तस्यैकैकरोमविवरे-समाधि-शतसहस्राणि सन्ति । अयं कुलपुत्रावलोकितेश्वरस्य परमपुण्यसम्भारः; इदमस्तथागतानाम् पुण्यसम्भारो न संविद्यते ।

प्रागेव बोधिसत्त्वभूतस्य भूतपूर्वं कुलपुत्राहं सिंहलराजो नाम बोधिसत्त्वभूतो ऽभुवम् ॥ ततो ऽहं सिंहलद्वीपयात्रां सम्प्रस्थितः, पञ्चभिर्वणिक्पुत्रशतैः सार्द्धं शकटैः भारैर्मूटैः पिटकै रज्जुभिर्गोभिर्गर्द्दभादिभिः प्रभूतं पुण्यमारोप्य सिंहलद्वीपं संप्रस्थितः ततोऽनुपूर्व्वेण ग्राम-नगर-निगम-पर्व्वत-पत्तनेषु चंचूर्य्यमाणः सिंहल द्वीप मनुप्राप्तः । येन निपुणस्तद्यानपात्रं प्रतिपादितं । तदा मे कर्णधारा आहुः—कथय कथय युष्माकं कतमद्द्वीपेषु गमनायेच्छा वायवो वान्ति । अथवा रत्नद्वीपेषु वायवो वान्ति । अथवा राक्षसद्वीपेषु वायवो वान्ति ? अथ कर्णधार एवमाह—यत् खलु देवो जानीयात् सिंहलद्वीपेषु वायवो वान्ति । अथ तद्यानपात्र मारुह्य सिंहलद्वीपं सुप्रस्थितः ।



ततो ऽहं सिंहलद्वीप-निवासिनीभी राक्षसीभिः संप्रस्थितो विदित्वा अकालवायव उत्सृष्टाः । तच्च तद्यानपात्रं खण्ड-खण्डं विशीर्णं ते च वणिक्पुरुषा उदके पतिता बाहुबलेन सन्तर्तुमारब्धाः ततस्तीरस्य समीप मनुप्राप्ताः ॥

ततो राक्षसीनां पञ्चशतानि निःक्रान्तानि किलकिलायमानानि । कुमारीरूप मभिनिर्म्माय तदा कुलस्य समीपमनुप्राप्ताः । उत्ताण्ड शाटकानि दत्वा उदकेभ्य उत्क्षिप्ताः । ते च स्वकीयानि वस्त्राणि शरीरे लग्नानि गृहीत्वा निष्पीड़ितु मारब्धाः; निष्पीड़यित्वा ते तस्मात् स्थानादतिक्रम्यान्यप्रदेशे महत चम्पकवृक्षस्य तले विश्रान्ता विश्रमित्वा परस्परं सांकथ्यं कर्तु मारब्धाः । कोऽस्माक मुपायः संविद्यते ? ते कथयन्ति नास्माकं उपायस्य स्थानं । एवं सांकथ्यं कृत्वा तूष्णीम्भावेन व्यवस्थिताः । अथ तेषां राक्षस्यः पुरुषाणां पुरतः स्थित्वैव माहुः—स्वागतं भवन्त आगच्छतां । अस्वामिकानां स्वामी भव । अगतिकानां गतिको भव । अद्वीपानां द्वीपोभव । अनालयनानां अपरायणानां आलयोभव । परायणो भव । इमानि तेऽत्र गृहाणि पानगृहाणि यानगृहाणि वस्त्रगृहाणि कटककेयूराणां मौलीकुण्डलानां गृहाणि ।

उद्यानरमणीयानि पुष्करिणी-रमनीयानि सन्तिष्ठन्तिताभिः। राक्षसीभि रेकैकं पुरुषं गृहीत्वा स्वकं स्वकन्निवेशनम्प्रतुपगता: ॥ या च तासां राक्षसीनां ज्येष्ठतरा तयाहं स्वकीयं निवेशनं नीत्वा दिव्य-रसरासीशोपेतेनाहारेण सन्तर्पित:। सन्तर्पयित्वा क्रीड़ितुमारब्धा ॥ स तु ततो मानुष्यकेन सौख्येन सन्तर्पित: एवं द्वि-त्रि-सप्त-दिनान्यतिक्रान्तानि स रात्रौ शयित:। एवं यावत् पश्यति रतिकरं रतिकर-हसनं तदाहं विस्मय मापन्न:। न कदाचित् स्यात् मया दृष्टं वा श्रुतं वा प्रज्वलित मेव रतिकर-हसनं; तदेव मया तस्य प्रत्याहार: कृत:—किं कारणं त्वं हससे? इयं सिंहलद्वीपनिवासिनी राक्षसी सा तवजीवितान्तरायं करिष्यति। तदा मे तस्य प्रत्याहार: कृत:—त्वं जानासि राक्षसीति? स कथयति—यदि न प्रतीयसि दक्षिणपश्चिमलिकां गृहीत्वा ऽनुविचरन् गच्छ। तत्रायं स नगर-मूर्द्धमुच्चं गवाक्ष-तोरण विप्रहीणच्छाप्रतिहतं, तत्रानेकानि वणिग्जनानि भक्षयित्वा अस्थीनि प्रक्षिप्तानि। अन्ये च जीवन्तो अन्ये च मृता:। यदि न प्रतीयसि तदपिमार्गं गच्छ। गत्वा च मार्गन्निरीक्ष्य तदा मे श्रद्दधास्यसि। तदा तस्यास्तेन मोहजाला नाम निद्राति सा ॥

अथ स बोधिसत्वो रात्रिप्रथमयामे समये तस्या राक्षस्या: सकाशा दुत्थाय संप्रस्थित:। चन्द्रावभासं खड्गं सञ्जोक्तम् उप गृह्यानु विचरं स्तां दक्षिण-पश्चिमलिकां गृहीत्वा सम्प्रस्थित:। अनुपूर्व्वेणायसन्नगरमनु प्राप्त:, समं तेन परिक्रमति। न च द्वाराणि गवाक्षाणि समनु पश्यति। अथ तस्मिन्नायसे नगरे महान् य: चम्पकवृक्षस्तत्रैवारुह्य ततो मया तेषा मुत्कासन-



शब्द: कृत:। ततो मे वणिक्पुरुषा: कथयन्ति। यत् खलु महासार्थवाहो जानीयाद् वयं राक्षसीभि रायसे नगरे प्रक्षिप्ता: तदा-दिने दिने शतं पुरुषाणां गृहीत्वा भक्षयन्ति। तान् भक्षयित्वा अस्थीन्यत्रैवायसे नगरे क्षिपन्ति। तेन तस्य भूतपूर्व्वं वर्ण्णितं। तदाहं चम्पकवृक्षादवतीर्य पुनरेव दक्षिणां पश्चलिकां गृहीत्वानु विचरन् त्वरित आगच्छामि स्म। ततो प्रविष्ट: ॥

अथ रतिकरो मामेतदवोचत्—दृष्टस्ते सार्थवाह! मद्वचनं? उक्तं च मया दृष्टं युस्माकं सत्यं सांकथ्यकृतं। तदा मेऽस्य प्रत्याहार: कृत: सत्यमेव क उपायोऽस्माकं? अथ स रतिकर एतवोचत्। अस्ति मे महासार्थवाहोपायं। येनोपायेन सिंहलद्वीपात् स्वस्तिक्षेमाभ्यां जम्बूद्वीपं निर्गच्छसि पुनरेव, जम्बुद्वीपमप सरसि। अथ स रतिकरो मा मेतद वोचत्—अस्ति तस्मिन्नेव द्वीपे महासमुद्रतीरे देववालाहो नामाश्वराजो हीनदीनानुकम्पक:। स च वालाहो ऽश्वराज: सर्व्वश्वेतानामौषधीं भुक्त्वा सुवर्ण-वालुकास्थले श्रा ।तन-परिवर्त्तन-संपरिवर्त्तनं कृत्वा शरीरं प्रच्छोड़यति प्रच्छोड़यित्वा प्रत्याहारं कुरुते। क: पारगामी क: पारगामी क: पारगामीति? त्वयैवं वक्तव्यम्—अहं देव। पारगामेति। एवं सांकथ्यं कृत्वा सा राक्षसी समीप मुपगम्य सार्द्धं शयित एव प्रतिविबुद्धा सा कथयति—आर्य्यपुत्र! कथं ते शरीरं शीतलं? तदा-मया तस्या मृषावादम्प्रत्याहारं कृतम्। बहि र्नगरस्य उच्चार-प्रस्रवेण निष्क्रान्तोऽहं तत: शरीरं शीतलं। इत्युक्त्वा सा पुनरपि शयिता। तत: प्रात: सूर्य्यस्य चाभ्युद्गमन-काल-समये उत्थाय तेषां वणिक्पुरुषाणा मारोचयति स्म। आगच्छन्तु भवन्तो बहि-र्नगरस्य गच्छाम:,ते सर्व्वे सहिता: समग्रा बहिर्नगरस्य संप्रस्थिता:।

ते च बहिर्नगरस्य गत्वा एकान्ते विश्रान्ताः सांकथ्यं कर्त्तुमारब्धाः—कस्य कीदृशी भार्य्या स्नेहवती? केचित् कथयन्ति अतिस्नेहन्न कुरुते। केचित् कथयन्ति मम दिव्यरसरसाग्रोपेतैराहारैः सन्धारयति। केचित् कथयन्ति नानाविधैर्व्वस्त्रैर्मम सन्धारयति। केचित् कथयन्ति ममदिव्यमौलीकुण्डलस्रग्दामानि धारयति। केचित् कथयन्ति नास्माकं कायदौर्व्वल्यं। केचित् कथयन्ति मम विविधानि चन्दन-कर्पूर-कस्तूरिकादीनि धारयति। एवं तैः सांकथ्यं कृतं। तदा तेषां वणिक्पुरुषाणाम्प्रत्याहारं करोतिस्म। न युष्माकं युक्तमिदं यद्वयं राक्षसीभिः प्रसक्ताः। इति श्रुत्वा ते विह्वलीभूताः एवमाहुः—सत्यं महासार्थवाह! राक्षसी सिंहल-द्वीप-निवासिनीति, तदा तेषाम्मया प्रत्याहारः कृतः, सत्यं सत्यं बुद्धधर्म्मसंघेभ्यः नेयं मानुषी राक्षसी। अथ ते वणिक्पुरुषाः कथयन्ति कास्माकं गतिः? किं परायणम्? तदा तेषाम्मया प्रत्याहारः कृतः—अस्माकं गतिः शरणं परायणं। वणिक्पुरुषाः कथयन्ति—उपदर्शय सार्थवाह!॥

अथ स तेषामेव माह।—अस्ति युष्माकं सिंहलद्वीपे बालाहो नाम अश्वराजः सच हीन-दीनानुकम्पकः। स सर्व्वश्वेतानामोषधी भुंक्त्वा सुवर्ण-वालुका-स्थले आवर्त्तनं करोति। कृत्वा च शरीरं प्रच्छोड़यित्वा प्राणिं प्रत्याहरेदिति। कः पारगामी कः पारगामी कः पारगामीति तत्रास्माभिर्गन्तव्यं ततोऽस्माभिर्वक्तव्यं वयं पारंगामिन इति। अथ ते वणिक् पुरुषा ऊचुः कतमे दिने गच्छामो वयं? स प्रत्याहारं कर्तुमारब्धः तृतीये दिवसेऽवश्यं गन्तव्यं पुरुषेण सम्बलं कर्त्तव्यमिति ते क्रियाकारं कृत्वा पुनरेव तं नगरम्प्रविष्टाः स्वक-स्वकान्निवेशन-



मुपगताः। ताभी राक्षसीभिः सम्भाषिताः श्रान्तस्त्वं दृष्टस्ते तानुद्यानरमणीयानि पुष्करिणीशतानि रमणीयानि। स कथयति न च मे किञ्चिद्दृष्टं। अथ सा राक्षसी तमेतद वोचत्। सन्ति आर्य्यपुत्र! विविधान्यस्मिन् सिंहलद्वीपे उद्यानरमणीयानि पुष्करिणी-रमणीयानि विविध-विचित्र-पुष्पपरिपूर्णानि। अनेकानि च पुष्करिणी-शतानि रमणीयानि। स प्रत्याहारं कर्त्तुमारब्धः। तृतीये दिवसे गमिष्यामीत्यतः सम्बलं कर्त्तव्यम्। उद्यान-भूमि-दर्शनायोपसंक्रमिष्यामि तानि च विविधानि पुष्करिणी-शतानि रमणीयानि। उद्यानशतानि पुष्पपरिपूर्णानि पश्यामि। तानि च विविधानि पुष्पाणि गृहीत्वा आगमिष्यामि। सा कथयति स्म—आर्य्यपुत्र! एवं करोम्यहं। तत स्तेन शरीरमनुविचिन्त्य। अथ राक्षस्यो जानन्ति योगन्ते नास्माकं जीवितान्तरायं करिष्यन्ति। ईदृशं शरीर मनु विचिन्त्य तूष्णीं भावेन व्यवस्थितः, तस्य तया प्रणीता ऽप्रणीतान्याहाराण्यनु प्रदत्तानि, भुक्त्वा च उच्छ्वासं कीरितं। सा कथयति राक्षसी—आर्य्यपुत्र! किं कारणं उच्छ्वासं कीरितं? अथ स तामेतद वोचत् स्वदेशाभिरता जाम्बुद्वीपका मनुष्याः॥

सा आह—किं करोष्यार्य्यपुत्र! स्वकीयेन विषयेनास्मिन्नेव सिंहलद्वीपे विविधान्यन्नगृहाणि पानगृहाणि वस्त्रगृहाणि। विविधान्युद्यान-रमणीयानि विविध-सुख मनुभवसे पुष्करिणी-रमणीयानि किं जम्बुद्वीप मनुशोचसे? तदाह—तूष्णींभावेन व्यवस्थितः। स तं दिवस मतिक्रान्तः द्वितीये दिवसे प्रणीतान्याहाराणि सत्वर मनु प्रदत्तानि सज्जीकृतानि। तृतीये दिवसे प्रत्युषकाल-समये सर्व्वे ते समवस्थिताः। ते च वहि-

नगरस्य निष्क्रान्ताः निष्क्रमित्वा क्रियाकारं कर्त्तुमारब्धाः। न पुनः केनचित् पुनरेव सिंहलद्वीपो निरीक्षितव्यः त्वरित मस्माभिर्गन्तव्यम् ईदृशं क्रिया कारं कृत्वा संप्रस्थिताः। त्वरितं त्वरित मेव लघु लघ्वेव गच्छन्ति। अनुपूर्व्वेण यत्र स वालाहकोऽश्वराजस्तत्रानु प्राप्ताः यावत्पश्यति—वालाह मश्वराजं तं सर्व्वश्वेताना मौषधीमास्वादयति। आस्वादयित्वा सुवर्ण-वालुकास्थले आवर्त्तनं करोति। कृत्वा च शरीरं प्रच्छोड़यति। यदा शरीरं प्रच्छोड़यति तदा सिंहलद्वीपं चलति स्म त्रीणि वाक्यानि प्रत्याहरति स्म—कः पारगामी? कः पारगामी? कः पारगामीति। अथ ते वणिक्पुरुषा एव माहुः—वयं पारगामिनः। अथ स वालाहो ऽश्वराजस्तानेतद वोचत्। भो वणिक्पुरुषाः! यदा शरीरं प्रच्छोड़यामि न तदा युष्माकं केनचित् सिंहलद्वीपो निरीक्षितव्यः। न केनचिच्चक्षुर्विस्फुरितव्यं। ते तादृशं क्रियाकारं कृत्वा। तदाहं प्रथमतर-मारूढ़ः पश्चात् पञ्चशतानि वणिग्जनाः यदा ते आरूढ़ाः तदा सिंहलद्वीपनिवासिन्यो राक्षस्यः किलकिलायमानाः पृष्ठतः पृष्ठतो धावन्ति स्म रुदन्त्यः करुण-करुणैर्विलापैः। ततस्तैरुदच्छब्दं श्रुत्वा प्रति निवर्त्य निरीक्षितु मारब्धं। तैर्निरीक्ष्यन्ते तदा तेऽधोमुखा उदके पतन्ति स्म। यदा ते उदके पतिताः तदा राक्षस्य उत्क्षिप्य मासं भक्षयन्ति स्म। तदाह मेकाकी जम्बूद्वीप मेवं प्रत्युग्गतः। तदा तीरस्य समीपे वालाह मश्वराजं त्रिःप्रदक्षिणीकृत्य तत्रैव प्रक्रान्तः। ततोहं सम्प्रस्थितः स्वकीयन्निवेशन मनु पूर्व्वेणानु प्राप्तः। तदा मे मातापितरौ कंठे परिष्वज्य रोदितु मारब्धौ। ततो वाष्पेण पटलानि



विस्फुटितानि ततोद्रष्टुमारब्धौ ततो मातापितृभ्यां सार्द्धं विश्रान्तस्तेन तेषां सर्व्वंभूतपूर्व्वं वृत्तान्त माख्यातम्। ततस्तौ मातापितरौ कथयतः स्मः। जीवंस्तु पुत्रस्त्व मनु प्राप्तः। नास्माकं द्रव्येण कृत्यं जराकाले यष्टिभूतो ऽन्धकाले मार्गस्योपमर्दकः मरणकाले पिण्डदाता मृतस्य सनाथो करणीयं यथा शीतलो वातो नाम पुत्रआह्लादकरः। एतद् वचनं मातापितरौ चाख्यातम्॥ ईदृशं मया सर्व्वंणीवरणविष्कम्भिन्! सार्थवाह-बोधिसत्वभूतेन दुःखमनुभूतम्॥

तद्यथापि नाम सर्व्वणीवरणविष्कम्भिन्! वालाहक स्तमश्वराज भूते नावलोकितेश्वरेण बोधिसत्वेन महासत्वेन तादृशादहं मृत्युभयात् परिमोक्षितः। तद्यथापि नाम सर्व्वणीवरणविष्कम्भिन्! न शक्नोम्यवलोकितेश्वरस्य पुण्यसम्भारं गणयितुं अल्पमात्र मिदं सांकथ्यं कृतम् एकैकरोमविवरस्य।

## ॥ इति अश्वराज-वर्णनं नाम प्रथम-प्रकरणम्॥

तद्यथापि नाम सर्व्वणीवरणविष्कम्भिन्! सुवर्ण नाम रोमविवरं। तत्रानेकानि गन्धर्व्वकोटिनियुतशतसहस्राणि प्रतिवसन्ति स्म। तेन च सांसारिकेन दुःखेन न वाधान्ते। परमेण सौख्येन सन्तर्पिता भवन्ति दिव्यानि वस्तूनि प्रादुर्भवन्ति। तत्र न च ते रागेण वाध्यन्ते। न च मोहेन वाध्यन्ते। न च द्वेषेण वाध्यन्ते। न च ते आवातचित्तमुत्पादयन्ति। न च तेषां हिंसाचित्त मुत्पद्यन्ते। ते सततं समित मार्य्याष्टाङ्गिकमार्गं मुपदर्शिता भवन्ति। सततकालं धर्म्माभि कांक्षिणो भवन्ति। तद्यथापि नाम सर्व्वणीवरणविष्कम्भिन्! सुवर्णनाम

रोमविवरे अवभासं नाम चिन्तामणिरत्नं। यदा ते गन्धर्व्वा अभिप्राय श्चिन्तयन्ति तदा तेषामभिप्रायोऽनुसिध्यति। तदा सुवर्णरोमविवरा दतिक्रम्य कृष्णो नाम रोमविवर स्तत्रानेकानि ऋषिकोटिनियुतशतसहस्राणि प्रतिवसन्ति। केचिदेका भिज्ञाः केचिद् द्वाभिज्ञाः केचित् त्र्यभिज्ञाः केचिच्चतुरभिज्ञाः केचित्पञ्चाभिज्ञाः केचित् षड़भिज्ञाः। तस्मिं श्च रोमविवरे रूप्यमयी भूमिः कनकमयाः पर्व्वता रूप्यमयाः शृङ्गाः पद्मरागै रुपचिताः पर्व्वतास्तादृशाः सप्त-सप्तति-पर्व्वता एकैक-पर्व्वते ऽशीति सहस्राणि ऋषीणां प्रतिवसन्ति। तेषाञ्च ऋषीणा मीदृशा पर्णकुटिर-कल्पवृक्षाणि दृश्यन्ते। लोहितदण्डाः सुवर्ण-रूप्य-पत्रा रत्नावभाषिताः एकैकपार्श्वे रोमविवरे चतस्रः पुष्करिण्यः केचिदष्टांगोपेतेन वारिणा परिपूर्णाः केचित् पुष्प-परिपूर्णास्तासां कुल्यचार-समीपे दिव्याः चम्पक-द्रुमवृक्षाः सुगन्धाश्चन्दनवृक्षाः परिशोभिताः कल्पवृक्षाः संदृश्यन्ते। दिव्याम्बराभरण-प्रलम्बिता श्रोत्रकुण्डल-प्रलम्बिता हारार्द्धहार-प्रलम्बिताः केयूर-नूपुर-स्वर्णाभरण-प्रलम्बिता सौवर्णपत्तास्तत्रैकैक-कल्प-वृक्षे गन्धर्व्वशतं विश्रान्तं। यदा ते वाय-प्रत्याहार मुदीरयन्ति तदा मृग-पक्ष्यादयः संवेगमापद्यन्ते। सुख-दुःख मिदं सांसारिकाणां सत्त्वानां; कथञ्चाम्बुधोपि दुःख मनु भवन्ति जाति-जरा-मरणं पश्यन्ति। इष्ट-प्रिय-वियोग मप्रिय-संप्रयोगं पश्यन्ति। मानुष्यकाणि बहूनि दुःखानि प्रत्यनुभवन्ति इत्येवन्ते मृग-पक्षिणः संवेग मनु विचिन्त्य यदा कारण्डव्यूहस्य महायान सूत्ररत्न राजस्य नामानुस्मरन्ति। तदा तेगान्धिख्य-रस-रसाग्रोपिता आहाराः प्रादुर्भवन्ति। दिव्यानि च सौगन्धिकानि वस्तूनि प्रादुर्भवन्ति। दिव्यानि वस्त्राणि प्रादु-



र्भवन्ति। यदा ते ऽभिप्राय मनु विचिन्तयन्ति तदाभिप्रायाः सिध्यन्ति॥

अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतद वोचत्। परमाश्चर्य्याद्भुतप्राप्तोहं भगवन्! भगवानाह—किं कारणं कुलपुत्र! परमविस्मय मापन्नः? अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतद वोचत्—यदा भगवन्! कारण्डव्यूहस्य महायानसूत्ररत्नराजस्य नामा नुस्मरन्ति। तदाभि प्रायो ऽनुसिध्यन्ति। यस्य नामधेयमात्रेण ईदृशानि वस्तूनि प्रादुर्भवन्ति। सुखिता स्ते सत्त्वा ये कारण्डव्यूहमहायान सूत्ररत्न राजं श्रोष्यन्ति लिखापयिष्यन्ति धारयिष्यन्ति वाचयिष्यन्ति पर्य्यवाप्स्यन्ति योऽनिशञ्च मनसि करिष्यन्ति। ये कारण्डव्यूहस्य महायान सूत्रराजस्यैकाक्षरमपि लिखापयिष्यन्ति ते इदं सांसारिकं दुःखन्न पश्यन्ति। न च ते चण्डाल-कुक्कुर-कुलेषु जायन्ते न च ते हीनेन्द्रिया भवन्ति। न च ते खञ्जकुब्जकोर्दनासगरण्डलम्बोष्ठाश्च सत्त्वाः कुष्ठिनश्च सन्तो न च तेषां काये व्याधिः संक्रमते। आरोग्यवलवत्प्रीणितेन्द्रियाश्च भवन्ति। अथ भगवान् साधुकार मदात्। साधु साधु सर्व्वणीवरणविष्कम्भिन्! यस्त्वमीदृशं प्रतिभानं करोषि। अनेकानि देव-नाग-यक्ष-गन्धर्व्वा-ऽसुरगरुड़-किन्नर-महोरग-मनुष्या-ऽमनुष्या उपासकोपासिका-सहस्राणि सन्निपतितानि—त्वयेदृग्धर्म्म-साकाथ्यं कृतम्। यतस्त्वमीदृशो वै पुण्य-प्रतिभानः कृतः॥

अथ सर्व्वणीवरणविष्कम्भी भगवन्तमेतद वोचत्। यदा भगवन्निदं प्रश्न मनिर्द्दिष्टं तदा देवपुत्राणा मभेद्या श्रद्धोत्पन्ना।

अथ भगवान् साधुकार मदात्। साधु साधु कुलपुत्र! यस्त्वम् एवं पुनः पुनस्तथागत मन्वेषसे ॥

तद्यथापि नाम सर्व्वणीवरणविष्कम्भिन्! कृष्णा नाम रोमविवराद वतीर्य्य रत्नकुण्डलो नाम रोमविवरः। तत्रानेकानि गन्धर्व्वकन्या-कोटिनियुतशतसहस्राणि प्रतिवसन्ति। ताश्च गन्धर्व्व-कन्या अभिरूपाः दर्शनीयाः परमया शुभवर्ण-पुष्कलतया समन्वागता दिव्यालंकार-विभूषितशरीरा अप्सरसामिव प्रतिस्पर्द्धिन्यः तादृश्यः परमशोभनाः न च ता रागदुःखेन बाध्यन्ते। न च द्वेष दुःखेन बाध्यन्ते। न च मोहदुःखेन बाध्यन्ते। न च तासां काये किञ्चिन्मानुषीन्दुःखं संविद्यते। ताश्च गन्धर्व्वकन्या स्त्रिकाल मवलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्य नाम मनुस्मरन्ति। यदा त्रिकाल मनुस्मरन्ति तदा तासां सर्व्ववस्तूनि प्रादुर्भवन्ति।

अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतद वोचत्। गमिष्याम्यहं भगवन्! तानि रोम विवराणि द्रष्टुकामोऽहम् ॥ भगवानाह—अग्राह्यास्ते कुलपुत्र! रोमविवराः असंस्पर्शा यथा ऽऽकाशधातुर ग्राह्योऽसंस्पर्शः। एव मेव ते कुलपुत्र! रोमविवरा अग्राह्या असंस्पर्शाः। तेषु रोमविवरेषु समन्तभद्रो बोधिसत्वो महासत्व स्तेषां रोमविवराणां द्वादश वर्षाणि परिभ्रमितो न च तेन तानि रोम विवराणि दृष्टाणि। यस्यैकैकरोमविवरे स्थितं बुद्धशतं तेनापि न दृष्टानि। प्रागेवान्ये बोधिसत्वभूताः।

अथ सर्व्वणीवरणविष्कम्भी भगवन्तमेतद् वोचत—यदा भगवन्! समन्तभद्रेण बोधिसत्वेन महासत्वेन न दृष्टं द्वादशवर्षाणि परिभ्रमता। न च तेन तानि रोमविवराणि



दृष्टाणि। अस्यैकैकरोमविवरे स्थितं बुद्धशतं तेनापि न दृष्टं। तदा तेषां रोमविवराणामन्ततोऽहमपि किं गमिष्यामि?। आह—कुलपुत्र! मयापि तस्य रोमविवरं वीक्ष्यमाणेन परिमार्गयमाणेन च दृश्यते, सर्व्वणीवरणविष्कम्भिन्! कुलपुत्रायं मायावी असाध्यः सूक्ष्मएव मनु दृश्यते। निरञ्जनो रूपी महापी शतसहस्रभुजः कोटिशतसहस्र-नेत्रो विश्वरूपी एकादशशीर्षः महायोगी निर्व्वाण-भूमि-व्यवस्थितः सुचेतना महाप्राज्ञः भवोत्तारकः कुलीनोऽनादर्शी प्राज्ञो निर्द्दिशस्तथाच्छायाभूतः सर्व्वधर्म्मेषु एव मेव कुलपुत्रावलोकितेश्वरो बोधिसत्वो न श्रुतो न केन चिद्दृश्यते तस्य स्वभावका अन्यथात्तर्गता न पश्यन्ति। प्रागेव समन्तभद्रादयोऽन्ये च बोधिसत्वाः, अचिन्त्योयं कुलपुत्र! अवलोकितेश्वरो बोधिसत्वो महासत्वः प्रातिहार्य्याणि समुपदर्शयति। अनेकानि च बोधिसत्व-कोटि-नियुत-शत-सहस्राणि परिपाचयति, सत्वांश्च तां बोधिमार्गे प्रतिष्ठापयति। प्रतिष्ठापयित्वा सुखावतीलोकधातु मनु गच्छति। अमिताभस्य तथागतस्यान्तिके धर्म्म मनु शृणोति।

अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतद वोचत्—केनोपायेन भगवन्! पश्यामि अहम् अवलोकितेश्वरं बोधिसत्व म्महासत्वम् भगवानाह—यदि कुलपुत्र! इहैव सहालोकधातु मागच्छति मम दर्शनाय वन्दनाय पर्य्युपासनाय!! अथ सर्व्वणीवरण विष्कम्भी भगवन्त मेतद वोचत्—अनुजानाम्यहं भगवन्न वलोकितेश्वरो बोधिसत्वो महासत्व आगच्छति? भगवानाह—यदा कुलपुत्र! सत्व परिपाको भवति तदा वलोकितेश्वरः प्रथमतर मागच्छति।

अथ सर्व्वणीवरणविष्कम्भी बोधिसत्वः करे कपोलन्दत्वा चिन्तापरो व्यवस्थितः—किं मया पापरतेन चिरकालजीविकया तेनावलोकितेश्वर-दर्शन-विप्रहीणेनान्धभूतेन तमोनुप्राप्तमार्ग-संप्रस्थितेन अथ सर्व्वणीवरणविष्कम्भी बोधिसत्वः पुनरपि भगवन्त मेतद् वोचत्—कास्मिन् काले भगवन्न वलोकितेश्वर आगच्छति? अथ भगवान पीदं वचनं श्रुत्वा हसति, व्यवहसति च। अकालस्ते कुलपुत्र! अवलोकितेश्वरस्यागमनकालसमयः। तद्यथापि नाम कुलपुत्र! ततो रोमविवरा दवतीर्य्यामृत विन्दुर्नाम रोमविवरः तत्रानेकानि देवपुत्र-कोटि-नियुत-शत-सहस्राणि प्रतिवसन्ति। केचिदेकभूमिकाः, केचिद् द्विभूमिकाः, केचित्त्रिभूमिकाः, केचिच्चतुर्भूमिकाः, केचित् पञ्चभूमिकाः केचित् षड् भूमिकाः, केचित्सप्तभूमिकाः, केचिदष्टभूमिकाः, केचिन्नवभूमिकाः, केचिद्दशभूमिकाः प्रतिष्ठिता बोधिसत्वा महासत्वा वसन्ति। तद्यथापि नाम सर्व्वणीवरणविष्कम्भिन्नस्मिन्नमृत विन्दौ रोमविवरे षष्ठि पर्व्वताः सुवर्णरूप्यमयाः एकैकपर्व्वतः षष्टियोजनसहस्राण्युच्छ्रयेण; तदेषां पर्व्वतानान्नवनवति-शृङ्ग-सहस्राणि दिव्यसुवर्णरत्नोपचितानि; पार्श्वे केचिदेकचित्तोत्पादिका बोधिसत्वाः प्रति वसन्ति। तेषु पर्व्वतराजिषु अनेकानि गन्धर्व्व-कोटि-नियुत-शत-सहस्राणि प्रतिवसन्ति। ये तस्मिं रोमविवरे सततं सञ्चितं निर्नादितं सूर्य्यन्धारयन्ति! तद्यथापि नाम सर्व्वणीवरणविष्कम्भि न्तस्मिंश्चामृतविन्दौ रोमविवरे कानि विमाण-कोटि-नियुत-शतसहस्राणि रत्नपरिखचितानि शोभणीयानि दर्शनियानि विचित्राणि मुक्ताहार शतसहस्राणि प्रलम्बितानि। तेषु विमानेषु बोधिसत्वा विश्रमित्वा धर्म्मसां-



कथ्यं कुर्व्वन्ति। ततो विमानान्निष्क्रम्य स्वकस्वकानि चंक्रमणानि प्रत्युद्गताः। चंक्रमे चंक्रमे सप्तति सप्तति पुष्करण्यः केचिदष्टाङ्गोपेतेन वारिणा परिपूर्णाः, केचिद्विविध-पुष्प-परिपूर्णाः। — उत्पल-पद्म-कुमुद-पुण्डरीक-सौगन्धिक-मान्दार-महामान्दार-पुष्प-परिपूर्णास्तेषु चंक्रमेषु मनोरमाः कल्पवृक्षाः लोहितवर्णाः सुवर्णरूप्यपत्रा दिव्यालंकार-प्रलम्बिता मौलीकुण्डलस्रग्दाम-प्रलम्बिता हारार्द्धहारप्रलम्बिताः केयुरप्रलम्बिता तदन्ये विविधालङ्कार प्रलंविताः, तेषु चंक्रमेषु रात्रौ तेबोधिसत्वाश्चंक्रमन्ति, विविधञ्च महायान मनुस्मरन्ति, नैर्व्वाणिकीं भूमिमनु विचिन्तयन्ति। सांसारिकं दुःख मनु विचिन्तयन्ति। नरकनिर्य्यासं चिन्तयन्ति। संचिन्तयित्वा मैत्रीभावयन्ति। एव मेव सर्व्वणीवरणविष्कम्भिं स्तस्मिन् रोमविवरे ईदृशा बोधिसत्वा वसन्ति। ततो ऽमृतवित्तविन्दु रोमविवरा दवतीर्य्य वज्रमुखो नाम रोमविवर स्तत्रानेकानि किन्नरशतसहस्राणि प्रतिवसन्ति। अंगद-कुण्डल-केयुर-विचित्र-माल्या-ऽऽभरणानुलेपन-परमशोभमानि दृश्यन्ते। सततकालं बुद्धधर्म्मसङ्घाभिप्रसन्नाः एकाग्रधर्म्ममैत्री विहारिकाः चान्तिसम्भाविता निर्व्वाणचिन्तकाः सर्व्वगमानुष्थकाः ईदृशास्ते कुलपुत्र! किन्नरा धर्म्माभिरताः। तस्मिन्नेद रोमविवरे अनेकानि पर्व्वतविवराणि शतसहस्राणि। केचिद्वज्रमयाः केचिद् द्रुप्यमयाः केचित् सुवर्णमयाः केचित् स्फटिकमयाः केचित् पद्मरागमयाः केचिदिन्द्रनीलमयाः केचित्सप्तरत्नमयाः। ईदृशानि च तत्र कुलपुत्र! रोमविवरे सद्धर्म्मनिमित्तानि च दृश्यन्ते। तत्र लोमविवरे अनेका हि कल्पवृक्षा अनेकविद्रुमवृक्षा चन्दनवृक्षाः सौगन्धिकवृक्षाः; अकानि

पुष्करिणीशतसहस्राणि दिव्यानि विमानानि, स्फटिकरजतसंयुक्ता परमशोभनीयाः रमणीया प्रासादा यत्र ईदृशानि विमानानि प्रादुर्भवन्ति। तेषु विमानेषु किन्नराविश्रान्ताः, विश्रमित्वा धर्म्म-सांकथ्यं कुर्व्वन्ति। यदुत दान-पारमिता-सांकथ्यं कुर्व्वन्ति। ध्यान-पारमिता-सांकथ्यं कुर्व्वन्ति । प्रज्ञा-पारमिता-सांकथ्यं कुर्व्वन्ति। एवं षट्पारमिता-सांकथ्यं कृत्वा स्वकस्वकानि चङ्क्रमणानि चङ्क्रमन्ति। केचित्सुवर्णमया श्चङ्क्रमा तेषु चङ्क्रमेषु सामन्तकेषु कल्पवृक्षाः लोहितदण्डाः सौवर्णरूप्यपत्राः दिव्यालङ्कारप्रलम्बिताः मौलीकुण्डलस्रग्दामप्रलम्बिताः केयूर प्रलम्बिता हारार्द्धहारप्रलम्बिताः रत्नहारप्रलम्बिताः तेच कल्पवृक्षा स्तस्मिंश्चङ्क्रमे कूटागारवत्संस्थिताः, कूटागारसदृशेषु तेषु चंक्रमेषु किन्नराश्चङ्क्रमन्ति। चङ्क्रम्यमाणाः सांसारिकं सत्वमनुविचिन्तयन्ति—अहो दुःखम्! जातिदुःखम्! अहो दुःखम्! जरामरण-दुःखम्! अहो दुःखं! तदपि दारिद्र्यदुःखम्! इष्टप्रियवियोगाप्रियावियोगदुःखन्तदपि कष्टतरं दुःखम्! ये चावीचावुपन्नाः, रौरवोपपन्नाः, कालसूत्रोपपन्नाः, हाहवे महानरके उपपन्नाः, प्रतापनेनरके उपपन्नाः, अग्निघटेषूपपन्नाः, वज्रशैलेषूपन्नाः, प्रेतनगरोपपन्नाः, तदेषां सर्व्वसत्वानान्दुःखतरम्। एवञ्च ते किन्नरा श्चित्ते न चिन्तयन्ति। चिन्तयित्वा नैर्व्वाणिकीं भूमीश्चिन्तयन्ति। एव मेव कुलपुत्र! किन्नरा धर्म्माभिरताः सतत कालमवलोकितेश्वरस्य नामानुस्मरन्ति। यदा ते नामानुस्मरन्ति तदा तेषां सर्व्वोपकरणै रुपस्थिता भवन्ति। एवं दुर्लभः कुलपुत्र! अवलोकितेश्वरो बोधिसत्वो महासत्वः सर्व्वसत्वाना म्मातापितृभूतः सर्व्वसत्वेष्वभयं ददः। सर्व्वसत्वेषु मार्गोपदर्शकः। सर्व्वसत्वेषु कल्याणमित्रः। एवं कुलपुत्र! अवलोकितेश्वरो बोधिसत्वो महासत्वः। दुर्लभं कुलपुत्र! तस्य नामग्रहणं ये च तस्य षड़क्षरी महाविद्या नामानुस्मरन्ति तदा तेषु रोमविवरेषु जायन्ते न च पुनरेव संसारे संसरन्ति। रोमविवरा द्रोमविवर मुप-संक्रामन्ति। तेषां तेषु रोमविवरेषु तावत्तिष्ठन्ति यावन्नैर्व्वाणिकीं भूमि मन्वेषन्ते ॥



## ॥ इति रोमविवरण-वर्णनं नाम द्वितीय प्रकरणम् ॥

अथ सर्व्वणीवरणविष्कम्भी भगवन्तमेतद वोचत्—कुतो भगवन्! षड़क्षरी महाविद्या प्राप्यते? भगवानाह—दुर्लभा कुलपुत्र! सा षड़क्षरी महाविद्या न च तथागता जानन्ति प्रागेव बोधिसत्वभूताः॥ अथ सर्व्वणीवरणविष्कम्भी भगवन्तमेतद वोचद्—यद्भगवन्! तथागता अर्हन्तः सम्यक् सम्बुद्धा न जानन्ति? भगवानाह कुलपुत्र! सा षडक्षरी महाविद्या त्ववलोकितेश्वरस्य परमहृदयं यश्च परमहृदयं जानाति स मोक्षं जानाति। अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतद वोचत्—अस्ति भगवन्! केचित्सत्वा ये षडक्षरीम्महाविद्यां जानन्ति? भगवानाह—न कश्चिज्जानीते कुलपुत्र! षडक्षरी महाविद्या राज्ञी। एषा दुरासदा अप्रमेया योगिन स्तथागताजानन्ति प्रागेव बोधिसत्वभूता अस्याः कुलपुत्र! षडक्षरि-महाविद्यायाः कारणेन सर्व्वे तथागताः षोडशकल्पासंख्येयाः पारभ्रमिताः प्रागेव बोधिसत्वभूताः॥ कुतो जानन्ति अयं स परमहृदयः। अवलोकितेश्वरस्य योप्ययं परिभ्रमति जगन्मण्डले कश्चिज्जानीते षडक्षरीं महाविद्यां पुण्यवन्त स्ते सत्वा ये षड़क्षरीम्महाविद्यां सतत परिग्रहं जपा-

भियुक्ता भवन्ति। तस्या जपकाले तु नवनवति गङ्गानदी
वालुकोपमा स्तथागताः सन्निपतंति परमाणुरजोपमा बोधि-
सत्वाः सन्निपतन्ति षट्पारमिता द्वारस्था भवन्ति। अन्ये च
द्वात्रिंशद्देवनिकाया देवपुत्राः सन्निपतिताः। चत्वारश्च महा-
राजान श्चतस्रोदिशो रक्षन्ति। सागरश्च नागराजः। अनवत-
प्तश्च नागराजः। तक्षकश्च नागराजः। वासुकिर्नागराजः—
एवं प्रमुखान्यनेकानि नागराजकोटीनियुतशतसहस्राणि धरणीं
परिरक्षन्ति। अन्ये च भौमा यक्षा अन्ये चावकाशं रक्षन्ति
तस्य कुलपुत्रस्यैकैकरोमविवरे तथागत-कोट्यो विश्रमन्ति विश्र-
मित्वा साधुकार मनु प्रयन्ति। साधु साधु कुलपुत्र! यस्त्वमी-
दृशं चिन्तामणिरत्नलब्धलाभोसि विमोचितास्ते सप्तकुल-वंशा-
ज्ञाति-परम्परया। ये चतव कुलपुत्र! कुक्षिगताः प्राणिनः सर्व्वे
ते वैवर्त्तिका बोधिसत्वा भविष्यन्ति। यः कश्चिदिमां धारयेत्
षडक्षरीम्महाविद्यां कायगतां कण्ठगतां वा स कुलपुत्र! वज्र-
काय-शरीर इति वेदितव्यः धातुस्तूप इति वेदितव्यः तथागत-
ज्ञान-कोटि रिति वेदितव्यः। यः कश्चित् कुलपुत्रो वा कुलदूहि-
ता वा इमां षडक्षरीम्महाविद्यां जपन्ति सोऽक्षयप्रतिभानो भवति
ज्ञानराशि-विशुद्धो भवति। महाकरुणया समन्वागतो भवति।
स दिने दिने षट्पारमिताः परिपूरयति। विद्याधर-चक्रवर्त्त्यभि-
षेकम्प्रति रमते। यस्य कस्यचिदुच्छ्वसोच्छ्वासप्रश्वासन्ददाति
मैत्र्या वा द्वेषेण वा, सर्व्वे ते वैवर्त्तिकाधिसत्वा भवन्ति; क्षिप्रं
चानुत्तरां सम्यक् संबोधिमभि संबुध्यते। ये केचिद्धस्तस्पर्शने
नापि स्पृशन्ति। सर्व्वे ते चरमभविका बोधिसत्वा भवेयुः।
दर्शनमात्रेण स्त्री वा पुरुषो वा दारको वा दारिका वा मृग-



पक्षिणो गोमहिषगर्द्दभादयश्च चक्षुर्दर्शनेनापि पश्यन्ति।
सर्व्वे ते चरम-भविका बोधिसत्वा भवेयुः जाति-जरा-व्याधि
मरण-दुःख-प्रिय-विप्रयोग-विहीणा भवेयुः। अचिन्त्या योगिन
श्च भवेयुः। एवन्तु षडक्षरीम्महाविद्याज्जपमाणस्य सञ्चोदनो
भवति।

अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतद वोचत्। कथं
भगवन्! लभेयमहं षडक्षरीम्महाविद्यां सोचिन्त्योयोगानाञ्चा
प्रमेय ध्यानानाञ्चा परिस्थितश्चानुत्तरायां सम्यक् संबोधौ नि-
र्व्वाणस्योपदर्शकः। मोक्षस्य प्रवेशनं रागद्वेषस्य व्युपशमन-
न्धर्म्मराजस्य च परिपूरणं उन्मूलनं च संसारस्य पञ्चगतिकस्य
संशोषणञ्च नारकाणां क्लेशानां समूद्घातन मुत्तारणं च तिर्य्य-
ग्योनिगतानाञ्चास्वादो धर्म्माणाञ्च परिपूरणं सर्व्वज्ञ ज्ञानस्याक्षयं
निर्द्देशं श्रोतु मिच्छामि भगवन्! योमेषड़क्षरी म्महाविद्या समु
प्रयच्छति। तस्य चतुर्द्वीपान् सप्तरत्नपरिपूर्णां न्निर्य्यातयितुं
यदि भगवन्! लिख्यमानायापि भूर्ज्जन्न संविद्यते, न मसिं, न
च करमं। मदीयेन शोणितेन मसिं कुर्य्याच्चर्म्म मुत्पाद्य भूर्ज्जं
कुर्य्यादस्थिं भंक्त्वा च करमं कुर्य्यात्तदपि भगवन्मम नास्ति खेदं
शरीरस्य। स च मे मातापितृभूतो भवेत् गुरूणामपि गुरुश्च॥

अथ भगवान् सर्व्वणीवरणविष्कम्भिणं बोधिसत्व मेतद
वोचत्—स्मराम्यहं कुलपुत्रास्याः षडक्षरि-महाविद्यायाः कार-
णेन परमाणुरजोपमान् लोकधातून् परि भ्रमितो ऽनेकानि
तथागत-कोटि-नियुत-शतसहस्राणि मया पर्य्युपासितानि। न
च तेषान्तथागतानां सकाशात् सचालम्बापि श्रुता। तदा रत्नो-
त्तमो नाम तथागतोर्हन् सम्यक् सम्बुद्धो विद्याचरण सम्पन्नः सुगतो

लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानाञ्च बुद्धो भगवांस्तस्य मया पुरस्तादश्रूणि प्रमुक्तानि। तदा तेन तथागतेनार्हता सम्यक् सम्बुद्धेनाभिहितं मां कुलपुत्रैवं करुण-करुणान्यश्रूणि प्रमुञ्च। गच्छ कुलपुत्र! येन पद्मोत्तमो नाम लोकधातुस्तत्र पद्मोत्तमो नाम तथागतोऽर्हन् सम्यक् सम्बुद्धे नाभिहितमा कुलपुत्रैवं तिष्ठति ध्रीयते यापयति। सइमां षडक्षरीं महाविद्यामनु जानाति तस्य कुलपुत्राहं रत्नोत्तमस्य तथागतस्यान्तिकान् प्रक्रान्तः येन पद्मोत्तमस्य तथागतस्य बुद्धक्षत्रं तेनोपसंक्रान्त उपसंक्रम्य भगवतः पादौ शिरसा वन्दित्वा पुरस्तात् प्राञ्जली भूत्वोक्तम्। लभेय महं भगवन् पद्मोत्तम! षडक्षरीम्महाविद्यां राज्ञीं यस्या नामानुस्मरणमात्रेण सर्व्वपापानि क्षयन्ते दुर्लभाम्बोधिम्प्रतिलभते। येनाथेमान्यहं क्लिष्टोऽनेकानि लोकधातूनि दृष्ट्वा गत्वा मा व्यर्थश्रमो भवेयं। तदा पद्मोत्तमस्तथागत इमां षडक्षरीम्महाविद्यां गुणानुसंसारयति स्म॥

तद्यथापि नाम कुलपुत्र! शक्यते परमाणु-रजः-प्रमाण मुद्गृहीतुं, न तु कुलपुत्र! शक्यते षडक्षरिमहाविद्याया एकजापस्य पुण्यस्कन्धं गणयितुं। शक्यते मया कुलपुत्र! चतुस्समुद्रस्यैकैकां वालुकां गणयितुं, नतु कुलपुत्र! शक्यते मया षडक्षरि-महाविद्याया एकजापस्य पुण्यस्कन्धं गणयितुं। तद्यथापि नाम कुलपुत्र! कश्चिदेव पुरुषो भवेत्। स गृहं पूर्णं योजन-सहस्रं कुर्य्या द्विगुणपंचयोजनशतानि तं तिलफलैः परिपूर्णं कुर्य्यात्। यत्र सूचीविवरन्न संविद्यते, तत्र पुरुषो द्वारे स्थापितोऽ जरामरः स कल्पगतस्यातिक्रान्तस्यास्यैकतिलफलं वहिर्द्वारे प्रक्षिपेत्। तदनेन पर्य्यायेन तद्गृहसमूहप्रतिष्ठिता स्तिलाः परि-



क्षय-पर्य्यावदानं यावत् कालेन व्रजेयुः। तच्छक्यते मया गणयितुं। नतु कुलपुत्र! शक्यते षडक्षरिमहाविद्यायाः एकजापस्य पुण्यस्कन्धं गणयितुं। तद्यथापि नाम कुलपुत्र! चतुर्द्वीपे नानाविधानि कर्षिं कारयन्ति यव-गोधूम-शालि-मुद्ग-माषाद्यस्तिल-कोल-कुलत्थादिभिः, तत्र कालेन कालं नागराजानो वर्षधारामनु प्रयच्छन्ति तानि शस्यानि निष्पाद्यन्ते, ततस्ते परिपक्वाः परिछिद्यन्ते। एवं जम्बुद्वीपं खलं कुर्य्यात्, ततस्ते शकटे भौरे मुटैः पिठकै गोभि गर्द्दभादिभिर्लङ्घयित्वा तस्मिन् खलाभ्यन्तरे प्रक्षिपेरन्, तानि गोभिर्गर्द्दभैर्मर्द्दयित्वा महान्तं राशिन्निष्पाद्यते। शक्यते मया कुलपुत्र! एव एकैकानि फलानि गणयितुं नतु कुलपुत्र! शक्यते मया षडक्षरिमहाविद्याया एकजापस्य पुण्यस्कन्धं गणयितुं। तद्यथापि नाम कुलपुत्र! इमा महानद्यो जम्बुद्वीपे प्रवहन्ति रात्रौ दिवा च। तद्यथा गङ्गा शीता यमुना सिन्धुः शतद्रुः चन्द्रभागा ऐरावती सुमागन्धा हिमवती कलशोदरी चेति। एकैक-नदी पञ्च-सहस्र-परिवारा रात्रौ च दिवा महासमुद्रे प्रवहन्ति। एव मेव षडक्षरि-महाविद्याया एव जापस्य पुण्यस्कन्धः प्रवहति। तत्रासाम्महानदीनां शक्यते मया एकैकविन्दुं गणयितुं। नच कुलपुत्र! शक्यते मया षडक्षरिमहाविद्याया एकजापस्य पुण्यस्कन्धं गणयितुं। तद्यथापि नाम कुलपुत्र! चतुर्द्वीपेषु चतुष्पाज्जातीनां गोगर्द्दभ-महिषाश्व-हस्तिनः, श्व-जम्बुक-छागल-पशवः तथा सिंह-व्याघ्र-तरक्षु-मृग-मर्क्कट-शशकादयः; एषां मयैकैकानि रोमाणि शक्यते गणयितुं। नतु कुलपुत्र! षडक्षरि-महाविद्यायाः शक्यते एकजापस्य पुण्यस्कन्धं गणयितुं। तद्यथापि नाम कुल-

पुत्र ! वज्रांकुशो नाम पर्व्वतराजो नव-नवति-योजन-सहस्राण्युच्छ्रयेण ; चतुरशीतियोजनसहस्राण्यधस्तात्तस्य पर्व्वतराजस्य वज्रांकुशस्यैकं पार्श्वं चतुरशीतियोजनसहस्रन्तस्य च पार्श्वे पर्व्वतराजस्य, जरामरः पुरुषो भवेत् स कल्पस्यातिक्रान्तस्य एकवारं काशिक-वस्त्रेण परिमार्ज्जयेत्। एवं कृत्वा तस्य परिक्षयं पर्य्यावदानभ्भवेत्, एतत्कालेषु वर्ष-मास-दिन-मुहूर्त्त-नाडीकलाः यावत् श्वासाः तेषां प्रमाणं कर्त्तुं शक्यं। नतु षड़क्षरि-महाविद्यायाः शक्यते एकजापस्य पुण्यस्कन्धं गणयितुं। तद्यथापि नाम कुलपुत्र! महासमुद्रश्चतुरशीतियोजनसहस्रं गाम्भीर्य्येण, अप्रमेयं वैपुल्येन वडवामुखपर्य्यन्तं शक्यते मया शताग्रभिन्नया वालाग्रकोटैकैकं विन्दुं गणयितुं। नतु कुलपुत्र ! शक्यते मया षड़क्षरि-महाविद्याया पुण्यस्कन्धं गणयितुं। तद्यथापि नाम कुलपुत्र ! शक्यते मया शीर्षवनसैकैकपत्राणि गणयितुं। नतु षडक्षरिमहाविद्यायाः शक्यते एकजापस्य पुण्यस्कन्धं गणयितुं। तद्यथापि नाम कुलपुत्र ! चतुर्द्वीप-निवासिनः स्त्री पुरुष दारक दारिकास्ते सर्व्वे दशभूमि-प्रतिष्ठिता बोधिसत्त्वा भवेयुः यत्तेषां बोधिसत्त्वानां पुण्यस्कन्धं ततः षड़क्षरि-महाविद्याया एकजापस्य पुण्यस्कन्धं। तद्यथापि नाम कुलपुत्र ! द्वादशमासिकेन संवत्सरेण अधिमासिकेन त्रयोदश मासिकेन वा संवत्सरेण तया संवत्सर-गणनया पुर्णं कल्पं देवो रात्रौ दिवा वर्षति तत् शक्यते मया कुलपुत्र! एकैकं विन्दुं गणयितुं। नतु-कुलपुत्र ! षड़क्षरि-महाविद्याया एकजापस्य पुण्यस्कन्धं गणयितुं॥

एवं कुलपुत्र! बहवः मत्सदृशाः तथागताः कोटय एकस्थान-



"সেই সমস্ত কুকর্ম্মের ফল অধুনা ভোগ কর।" এই রূপ কথোপকথন করিতে করিতে যমকিঙ্করেরা স্বীয় কর্ম্মক্ষেত্রে লইয়া যায়।

অনন্তর সেই যমকিঙ্করগণ স্বীয় কর্ম্মক্ষেত্রে উপস্থিত হইয়া তাহাকে কালসূত্র নামক মহানরকে প্রক্ষেপ করে, তাহাতে ফেলিয়া তদীয় শরীরে এক এক শত শক্তি অস্ত্র বিদ্ধ করিতে থাকে, তাহাতেও জীবিত থাকে। পুনশ্চ দ্বিতীয় শত শক্তি অস্ত্র বিদ্ধ করিতে থাকে, তাহাতেও জীবিত থাকে, পুনশ্চ তৃতীয় শত শক্তি অস্ত্র বিদ্ধ করিতে থাকে, তাহাতেও যদি জীবিত থাকে কালপ্রাপ্ত না হয় তবে অগ্নির হ্রদে নিক্ষেপ করে, তথাপি কালপ্রাপ্ত না হইলে তপ্ত লৌহ-শলাকাতে বিদ্ধ করে, তদ্দ্বারাই সমস্ত শরীর দগ্ধ করে, অতিশয় প্রিয় দন্ত সকল প্রথমেই বিশীর্ণ করিয়া দেয়, তালুভাগে রন্ধ্র করিয়া দেয়, অধিক কি, কি তালু, কি কণ্ঠ, কি হৃদয়, সমস্ত শরীরই ইক্ষুযন্ত্রে মর্দ্দিতের ন্যায় সেই তপ্ত লৌহযন্ত্রে মর্দ্দিত করত দগ্ধ করে। তখন সেই পাপী এইরূপে আর্ত্তনাদ করিতে থাকে—"হায়! এই পরলোকে কেহ কি আমাদের ত্রাণকর্ত্তা হইবে ?!" হে মহারাজ! এই জন্যই অতি যত্নে পুণ্যকার্য্য করিতে হয়॥

আর্য্য অবলোকিতেশ্বর অসুরেন্দ্র বলিরাজাকে এইরূপ প্রকারান্তরে ধর্ম্মোপদেশ করত স্পষ্টাভিধানেও ধর্ম্মোপদেশ করিতে লাগিলেন—"প্রমত্ত হইবে না (১)। কখনও ঘৃণিত আমোদ করিবে না (২)। বহু দোষ দুষ্ট এই গৃহবাসই সমস্ত দারুণ নরকভূমি অতএব ইহা ত্যাগ করাই বিধেয় (৩)।"

ओं । अन्यथा त्वं शब्दादिति चेन्नाविशेषात् ॥ ७ ॥

ओं । नवा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ८ ॥

ओं । संज्ञातश्चेत्तदुक्त मस्ति तु तदपि । ओं ॥ ९ ॥

ओं व्याप्तेश्च समञ्जसं । ओं ॥ १० ॥

ओं । सर्वाभेदा दन्यत्रे मे । ओं ॥ ११ ॥

ओं । आनन्दादयः प्रधानस्य ओं ॥ १२ ॥

---

आत्मेत्ये वोपासीतेति शब्दादुपसंहारस्यान्यथात्व मिति चेन्न । एते गुणो पास्या इति विशेष वचना भावात् । सर्व्वै गुणै रेक एवेशिता ऽसा वुपासितव्यो नतु दोषैः कदाचिदिति विशेष वचनाच्च आत्मेत्ये वेत्यवधारण मनात्म निवृत्त्यर्थं ॥ ७ ॥

प्रकरण भेदान्न वोप संहारः कार्य्यः । परो वरीय सत्वा दिषु तावदेव न्युक्तं ॥ ८ ॥

सर्व्व विद्या उक्ता सोहं नाम विदेवास्मि नाम्न विदिति वचनात् सर्व्वस्य ब्रह्म नाम त्वात्तदुपसंहारः कार्य्यः । नामत्वात् सर्व्व विद्यानां गुणाना मुप संहृतिः । कार्य्येव ब्रह्मणि परे नात्र कार्य्या विचारणा । इति ब्रह्म तर्कः इति चेत् सत्यं । उक्ता प्युप संहारः तत् प्रमाणमप्यस्तेत्र नाम वात्र ता ब्रह्मणः सर्व्व विद्यास्वमादेकः सर्व्व गुणैर्विचिन्त्य इति कौण्डिन्यश्रुतौ ॥ ९ ॥

युज्यते चोपसंहारोऽनुपसंहारश्च योग्यता विशेषात् । गुणैः सर्व्वै रुपास्यो ऽसौ ब्रह्मणा परमेश्वरः । अन्यै र्यथाक्रमश्चैव मानुषैः कैश्चिदेवस्त्विति भविष्यत् पर्व्वणि ॥ १० ॥

सर्व्व गुण युक्तत्वे नोपासनादन्यत्रैव फले ब्रह्मादयो भवन्ति । सम्पूर्णोपासनाद् ब्रह्मा सम्पूर्णानन्द ताङ्गतः । इतरेतु यथा योगं सम्य ग्युक्तो भवन्ति हीति पाद्मे ॥ ११ ॥

सर्व्वेषां ममुक्षूणां कियन्नियमेनो पास्य मित्याह । प्रधान फलस्य मोक्ष स्यार्थं आनन्दो ज्ञानं सदात्मेत्यु पास्य एव । सच्चिदानन्द आत्मेति ब्रह्मो पासदिनिश्चितः । सर्व्वेषाञ्च मुमुक्षूणां फलमाम्यदपच्चितेति ब्रह्म तर्के ॥ १२ ॥



धारिता दिव्यं कल्पं चीवर-पिण्डपात्र-शयनासन-ग्लान-प्रत्यय-भैषज्य-परिस्कारैः सर्व्वोपकरणोपस्थानेनोपस्थिता भवेयुः । न च तथागताः शक्नुवन्ति षड़क्षरि-महाविद्यायाः पुण्यस्कन्धं गणयितुं । प्रागेवाह मेकाकी अस्मिँल्लोकधातौ विहरामि । अचिन्त्य-ध्यान-पदेष समुत्थानेनाहं कुलपुत्र ! भावनायोगमनुयुक्तः स च सूक्ष्मो धर्म्मः, अव्यक्तो धर्म्मः, अनागतो धर्म्मः, परमहृदय-प्राप्तः अवलोकितेश्वरस्य बोधिसत्वस्य महासत्वस्योपायकुशलै-धर्म्मैः प्रतिष्ठितः । एवं कुलपुत्र! षड़क्षरि-महाविद्याया उपाय-कौशल्यं प्राप्त महमपि कुलपुत्रानेकानि लोक-धातु-कोटी-नियुत-शतसहस्राणि परिभ्रमितो गत्वा चामिताभस्य तथागतस्य पुरस्तात् प्राञ्जलीभूत्वा धर्म्म-वेगेनाश्रूणि प्रमुक्तानि तथामिताभ स्तथागतो जानाति अनागत-प्रत्युत्पन्नम् ॥

तेन ममाभिहितं कुलपुत्र! षड़क्षरीं महाविद्यां राज्ञीमिच्छसि भावनायोग मनुयुक्तः । मयोक्त मिच्छामि सुगत! यथा तृषार्त्तः पानीय मन्वेषते एव महं भगवन् ! षड़क्षरी महाविद्यां सम-न्वेषमाणानेकलोकधातूनुपसङ्क्रान्तः पर्य्यु पासितानिमेऽनेकानि तथागत-कोटी-नियुत-शत-सहस्राणि न कस्य चित्सकाशात् मया लब्धा, षड़क्षरी-महाविद्या-राज्ञी त्वं भगवन् ! त्राता भव । शरणं परायणं विकलेन्द्रियस्य चक्षुर्भूतो भव । नष्ट-मार्गस्य दर्शको भव । सूर्य्यताप-दग्धानां छत्रभूतो भव । चतु-र्म्महापथे शालवृक्षइवभव । धर्म्म-परितृषितस्यानन्त-धर्म्म-मार्ग-मुपदर्शको भव । सुप्रतिष्ठित-चेतसो वज्रकवचभूतो भव ॥

अथामिताभस्य तथागतार्हत्सम्यक्सम्बुद्धस्य अवलोकितेश्व-रस्य बोधिसत्वस्य महासत्वस्य लक्ष्मिकतेन स्वरेण निर्घोषेणा

रोचयति। पश्य—कुलपुत्र! अयं पद्मोत्तमस्तथागतोऽर्हन्सम्यक्सम्बुद्धः षड़क्षरि-महाविद्यायाः कारणेनानेक-लोक-धातु-कोटी-नियुत-शतसहस्राणि परिभ्रमितो ददस्व कुलपुत्र! षड़क्षरीं महाविद्यां राज्ञीस्तथागत एवं परिभ्रमति।

## ॥ इति षड़क्षरि महाविद्या-माहात्म्यवर्णनं तृतीय प्रकरणम्॥

—:०:—

अथ अवलोकितेश्वरो भगवन्त मेतदवोचत्—अदृष्ट-मण्डलस्य न दातव्यां कथं भगवन्पद्माङ्कमुद्रां सन् गृह्णाति? कथं मणिधरां मुद्रां सञ्जानीते? कथं सर्व्वराजेन्द्रां सञ्जानीते। मण्डलपरिशुद्धिं कथं सञ्जानीते? मण्डलमेकदन्ति-भितश्चतुरस्रं पञ्च हस्त-प्रमाणं आकाशेन मध्ये मण्डलमा-मिताभं लिखेत्। इन्द्रनील-चूर्णं, पद्मराग-चूर्णं, मरकत-चूर्णं, स्फाटिक-चूर्णं, सुवर्ण-रूप्य-चूर्णान्यमिताभस्य तथागतस्य कारे संयोजयितव्यानि। दक्षिणे पार्श्वे महामणिधरो बोधिसत्वः कर्त्तव्यः। वामपार्श्वे षड़क्षरी महाविद्या कर्त्तव्या (चतुर्भुजा शरच्चन्द्र गौरवर्णा, नानालङ्कार-विभूषिता, वामहस्ते पद्मं कर्त्तव्यम्, दक्षिणहस्ते अक्षमाला कर्त्तव्या) द्वौ हस्तौ स-प्रयुक्तौ सर्व्वराजेन्द्रा नाम मुद्रा कर्त्तव्या। तस्याः षड़क्षरि-महाविद्यायाः पादमूले विद्याधरं प्रतिष्ठापयितव्यं, दक्षिणहस्ते धूपकटच्छुकं कर्त्तव्यं धूपायमानम्। वामहस्ते नानावि-धालङ्कार-परिपूर्णं पिटकं कर्त्तव्यं। तस्य च मण्डलस्य चतुर्द्वारेषु चत्वारो महाराजाः कर्त्तव्याः, नाना प्रहरण-



गृहीताः कर्त्तव्याः, तस्य मण्डलचतुष्कोणेषु चत्वारः पूर्णकुम्भाः नाना-मणि-रत्न-सञ्चिताः। यः कश्चित् कुलपुत्रो वा कुलदुहिता वा इच्छति मण्डलं प्रवेष्टुम्। तेन सर्व्वगोत्रस्यापरम्परया नामानि लिखितव्यानि, लिखित्वा च हस्ते गृहीतव्यानि च, मण्डले प्रथमतरन्तानि नामानि प्रक्षिपेत्। ते सर्व्वे चरम-भविका बोधिसत्वा भवन्ति। सर्व्व-मानुष्यकेण दुःखेन विप्रहीणा भविष्यन्ति, क्षिप्रं चानुत्तरां सम्यक्सम्बोधि मभि सम्बुध्यन्ते तत आचार्य्येणाऽस्यानि नैवन्दातव्या अथवा अडाधिमुक्तिकस्य दातव्या अथवा महायान-अडाधिमुक्तिकस्य दातव्या न च तीर्थिकस्य दातव्या॥

अथामिताभस्तथागतोऽर्हन्सम्यक्सम्बुद्धोऽवलोकितेश्वरं एतदवोचत्। यदि कुलपुत्र! इन्द्रनील-चूर्णं, पद्मरागतचूर्णं, सुवर्ण-रूप्य-चूर्णं, दरिद्रस्य कुलपुत्रस्य कुलदुहितुर्व्वा न संविद्यन्ते-तानि चूर्णानि अगत्यानाना रङ्गाणि संप्रयोक्तव्यानि। नाना रङ्गाणि संप्रयोक्तव्यानि नाना पुष्पैर्नाना गन्धैः। यदि कुलपुत्र! तदपि न संविद्यते देशान्तर-गतस्य स्थान-पद-च्युतस्य, तदाचार्य्येण मानसिक मण्डलं चिन्तितव्यम्। आचार्य्येण मन्त्र-मुद्रा-लक्षणा न्युपदर्शयितव्यानि।

## ॥ इति षड़क्षरि महाविद्या मण्डल वर्णनं चतुर्थ-प्रकरणम्॥

—:०:—

अथ पद्मोत्तमस्तथागतोऽर्हन्सम्यक् सम्बुद्धो अवलोकितेश्वर मेतदवोचत्। ददस्व मे कुलपुत्र! षड़क्षरीं महाविद्यां राज्ञीं

येनाह मनेक-सत्त्व-कोटी-नियुत-शत-सहस्राणि दुःखात् परिमोचयेयम्! यथा ते चिप्रञ्चानुत्तरां सम्यक्सम्बोधि मभिसम्बुध्यन्ते ।

अथावलोकितेश्वरो बोधिसत्त्वो महासत्त्वः पद्मोत्तमस्य तथागतस्यार्हतः सम्यक् सम्बुद्धसेमां षड़क्षरीं महाविद्यां मनुप्रयच्छति ॥

॥ * ॥ × ॥ ० ॥ × ॥ ओं मणिपद्मे हूं ॥ × ॥ ० ॥ × ॥ * ॥

यस्मिन् काले इयं षड़क्षरी महाविद्या अनुप्रदत्ता तदा चत्वारो द्वीपाः स देव-भवन-पर्य्यन्ताः कदलीपत्रेव सञ्चलिताः, क्षुभ्वा-श्चत्वारो महासमुद्राः सर्व्वविघ्नविनायकाः निस्सलायन्ते यक्ष-राक्षस-कुम्भाण्डा महाकाल-मातृगण-सहिताः ।

अथ पद्मोत्तमेन तथागतेन भुजङ्ग-सदृशं बाहुम्प्रसार्य्यावलोकितेश्वरस्य शतसहस्र-मूल्यं मुक्ताहारं, तेन गृहीत्वा अमिताभस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्योपनामितं, तेन गृहीत्वा तस्य पद्मोत्तमस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्योपनामितम् । अथ पद्मोत्तमस्तथागतोर्हत्सम्यक्सम्बुद्ध इमां षड़क्षरीं महाविद्यां गृहीत्वा येन पद्मोत्तमो नाम लोकधातु स्तेनोपसङ्क्रान्तः। एवं कुलपुत्र! मया भूतपूर्व्वं पद्मोत्तमस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य सकाशाच्छ्रुतम् । अथ सर्व्वनीवरणविष्कम्भी भगवन्त मेतदवोचत्—कथं भगवन्! लभेयं षड़क्षरीं महाविद्या राज्ञीं प्राप्तयोगस्य? यथाहि भगवन्नमृतस्य लब्धास्वादस्तु तृप्तिं न लभन्ते। एवमहं भगवन्! षड़क्षरि-महाविद्या-श्रुतमात्रेण तृप्तिन्न लभाम। पुण्यवन्तस्ते सत्त्वा य इमां षड़क्षरीं महाविद्यां जपन्ति शृण्वन्ति चिन्तयन्ति अध्याशयेन धारयन्ति ॥

भगवानाह—कुलपुत्र! यश्चेमां षड़क्षरीं महाविद्यां लिखापयेत्तेन



चतुरशीति-धर्म्मस्कन्ध-सहस्राणि लिखापितानि भवन्ति। परमाणु-रजोपमानास्तथागताना मर्हतां सम्यक्सम्बुद्धान् दिव्य सौवर्ण-रत्नमयान् स्तूपान् कारयेत्, कारयित्वा एक-दिने धात्वावरोपनं कुर्य्याद्यश्च तेषां फलविपाकः स षड़क्षरि-महाविद्याया एकस्याक्षरस्य फलविपाकः। अचिन्त्यो ऽगुणानां सुप्रतिष्ठितो मोक्षो यः कुलपुत्रो वा कुलदुहिता वेमां षड़क्षरीं महाविद्या ज्ञपेत्, स इमां समाधीन् प्रतिलभते ॥

तद्यथा मणिधरो नाम समाधिः, नरक-तिर्य्यक्-संशोधनं नाम समाधिः, वज्रकवचो नाम समाधिः, सुप्रतिष्ठित-चरणो नाम समाधिः, सर्व्वोपाय-कौशल्य-प्रवेशनो नाम समाधिः, विकिरिणो नाम समाधिः, सर्व्व-बुद्ध-चक्र-सन्दर्शनो नाम समाधिः, सर्व्व-धर्म्म-प्रवेशनो नाम समाधिः, ध्यानालङ्कारो नाम समाधिः, धर्म्मरथाभिरूढ़ो नाम समाधिः, राग-द्वेष-मोह-परिमोचणो नाम समाधिः, अनन्तवर्त्तो नाम समाधिः, षट्पारमिता निर्द्देशो नाम समाधिः, महामेरुधरो नाम समाधिः, सर्व्वभवोत्तारणो नाम समाधिः, सर्व्व-तथागत-अवलोकनो नाम समाधिः सुप्रतिष्ठितासनो नाम समाधिः ॥ एवम्प्रमुखाना मष्टोत्तर-समाधि-शतं प्रतिलभते। य इमां षड़क्षरीं महाविद्यान्धारयति ॥

## ॥ इति षड़क्षरि-महाविद्योपदेशो नाम पञ्चम प्रकरणम् ॥

—:०:—

अथ सर्व्वनीवरणविष्कम्भी भगवन्त मेतद वोचत्। कुत्राहं भगवन्! गच्छेयं यत्र षड़क्षरीं महाविद्याराज्ञीं लभेयम् ॥

भगवानाह—अस्ति कुलपुत्र ! वाराणस्यां महानगर्य्यां धर्म्म-
भाणको य इमां षडक्षरीं महाविद्यां धारयति वाचयति योऽनि-
शञ्च मनसि कुरुते ॥

आह—गमिष्याम्यहं भगवन् ! वाराणसीं महानगरीन्तस्य
धर्म्म-भाणकस्य दर्शनाय वन्दनाय पर्य्युपासनाय ॥

भगवानाह—साधु साधु कुलपुत्र ! एवङ्कुरुष्व दुर्लभस्तु
कुलपुत्र! धर्म्मभाणक स्तथागतसमो द्रष्टव्यः पुण्यकूट इव द्रष्टव्यः।
सर्व्व-तीर्था गङ्गेव द्रष्टव्यः । अवितथवादीव द्रष्टव्यः । भूतवादीव
द्रष्टव्यः । रत्नराशिरिव द्रष्टव्यः। वरदश्चिन्तामणि रिव द्रष्टव्यः।
धर्म्मराज इव द्रष्टव्यः। जगदुत्तारण इव द्रष्टव्यः। न च
कुलपुत्र ! त्वया धर्म्मभाणकं दृष्ट्वा विचिकित्सा-चित्त मुत्पाद-
यितव्यं। मा त्वं कुलपुत्र ! बोधिसत्वभूमिश्च्युत्वा अपाये प्रप-
त्स्यसे। स च धर्म्मभाणकः शीलविपन्नः। आचारविपन्नो
भार्य्या-पुत्र-दुहितृभिः परिवृतः काषायोच्चार-प्रस्राव-परिपूर्णः।
असंवृतेर्य्यापथः ॥

अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतद वोचत्। यथा
ज्ञप्तं भगवता। अथ सर्व्वणीवरणविष्कम्भी बोधिसत्वो महा-
सत्व अनेकै र्बोधिसत्व-पर्षद्-गृहस्थैः प्रव्रजितै र्दारक-दारिका-
दिभिः सम्प्रस्थित.। तस्य धर्म्मभाणकस्य पूजाकर्म्मणो दिव्यानि
छत्राणि दिव्यानि उपानहानि मौली-कुण्डल-स्रगदाम-केयूर-
हारार्द्धहार-रत्नहार-स्कन्धोपरिस्थजानिक-पृष्ठोत्तर्य्याण्यङ्गुष्ठ-विभि-
दिकान्यन्यानि च विविधानि वस्त्राणि चीवरानि धूपितानि
विद्याधर-सञ्चोदितानि काशिक-वस्त्राण्यग्नि-शौच-वस्त्राणि च
अन्यानि च विविधानि वस्त्राणि पुष्पाणि। तद्यथा—उत्पल-पद्म-



कुमुद-पुण्डरीक-मान्दार-महामान्दार-राशि-मञ्जुषक-महामञ्जुष-
काणि चौदुम्बराण्यन्यानि विविधानि काष्ठपुष्पाणि चम्पक-
करवीर-पाटलाणि मुक्तक-वार्षिकाणि सकुनाकाधूपितानि।
सुमना-नवमालिक-चक्रवाकोपशोभितानि। शालिकौसुम्भकानि
शनपविकानि नील-पीत-लोहितावदात माञ्जिष्ट स्फटिक-रजत-
वर्णाणि। अन्यानि च स्थल-जलजानि पुष्पाणि विविधानि
गृहीत्वा येन वाराणसी महानगरी तेनोपजगाम ॥ अनुपूर्व्वेण
वाराणसीं महानगरी मनुप्राप्तः॥ येन स धर्म्मभाणक स्तेनो-
पसङ्क्रान्तः। उपसङ्क्रम्य पादौ शिरसाभिवन्द्य स तेन दृष्टः
शीलविपन्न आचारविपन्नो संवृतेर्य्यापथस्तेन तानि छत्राण्यु-
पानहानि वस्त्राभरणानि गन्ध-माल्य-विलेपनानुपढौकितानि
तैर्व्वस्त्राभरणैः गन्धमालैश्च महतीं पूजां कृत्वा तस्य धर्म्मभाण-
कस्य पुरस्तात् प्राञ्जलीभूतः तद्विज्ञ मिदमवोचत्—अहो
धर्म्मनिधानास्वादको ऽमृतनिधिरिव सञ्चय अनवगाहो ऽसि,
सागरो यथा भाजनभूतो ऽसि सर्व्वमानुष्यभूतेषु एव ते;
तव सङ्काशाद्धर्म्मन्देशयतः देवा नागा यक्षा गन्धर्व्वा असुरा
गरुड़ाः किन्नरा महोरगा मनुष्या ऽमनुष्याः सर्व्वे ते सन्नि
पतिताः। तव धर्म्म-श्रवण-काले महावज्र-समये धर्म्म-पर्य्याय
न्निर्द्दिशसि परिमोचयसि बहवः सत्वा ये संसारे बन्धनबद्धाः
पुण्यवन्तास्ते सत्वाः येऽस्यां वाराणस्या महानगर्य्यां वसन्ति,
पश्यन्ति, तव सततं परिग्रहं कुर्व्वन्ति, दर्शन-मात्रेण सर्व्व-
पापानि निर्द्दहसि। यथाग्नि र्दहति वनान्तरम्। एवं त्वं
दर्शनेन सर्व्वपापानि दहसि। जानन्ति तव तथागता अर्हन्तः
सम्यक सम्बुद्धाः, अनेका चानेक-बोधिसत्व-कोटी-नियुत-शतसह-

स्त्राणि तव पूजा-कर्म्माणि उप संक्रामन्ति । ब्रह्मा विष्णु-महेश्वर-चन्द्रादित्य-वायु-वरुणाग्नयोयमश्च धर्म्मराजोऽन्ये च चत्वारो महाराजानः ॥

अथ स धर्म्मभाणक स्तस्मैतदवोचत् । मा त्वं कुलपुत्र ! कौशलता मुत्पादयसि कति मासाः क्लेशा औपभोगिकाः संसारस्य नैमित्तिकाः प्रजामण्डलस्योत्पादिकाः । ये च कुलपुत्राः षडक्षरीं महाविद्या-राज्ञीं जानन्ति । न च ते रागेन द्वेषेण मोहेन स लिप्यन्ते यथा जाम्बुनदस्य सुवर्णस्य न ऽसज्जते मलमेव मेव कुलपुत्र! यस्य षडक्षरीं महाविद्या कायगता न तस्य कायेन न रागेण न द्वेषेण न मोहेन संलिप्यते ।

अथ सर्व्वणीवरणविष्कम्भी गाढं पादे परिष्वजैन मेतद-वोचत्—विकलेन्द्रियस्य चक्षुर्भुतो भव, नष्टमार्गस्योपदर्शको भव । धर्मपरितृषितस्य धर्म्म रसेन-सन्तर्पय मे त्वम् । अनुत्तरा सम्यक्सम्बोधि-विप्रहीणस्य बोधि-बीजम्मे ददस्व धर्म्मा-णामवकाशं ददस्व । सुप्रतिष्ठित-रूपाणां कायपरिशुद्धिन्ददस्व । अभेद्याणां कुसलानाम् प्रतिलम्भ इति सर्व्वजनाः कथयन्ति वाक्यं मधुरो रचयम् एवं गुरुर्ददस्व मे षडक्षरीं महाविद्या-राज्ञीं येनाहं क्षिप्र मनुत्तरां सम्यक्सम्बोधि मभिसम्बुद्धो भवेयं । द्वादशा-कारं धर्म्मचक्रमावर्त्तयेयं । सर्व्वसत्त्वानां सांसारिकं दुःखं परि-मोचयेयं । षडक्षरी महाविद्या-राज्ञी लब्धलाभो भवेयं । ददस्व मे षडक्षरीं महाविद्या-राज्ञीं । त्राता भव शरणपरायणं अद्वीपानां द्वीपोभव ॥

अथ स धर्म्मभाणकस्तस्मै तदवोचत् । दुर्लभं षडक्षरि-महाविद्या-राज्ञ्या असमवज्रपदं । अभेद्यवज्रपदं । अनन्तर-



ज्ञान-दर्शनपदं । अक्षय-ज्ञानपदं । निरुत्तरपदं । मोक्ष-प्रवेशनपदं । तथागत-ज्ञान-विशुद्धिपदं । राग-द्वेष-मोह-संसार-दुःख-परिवर्ज्जनपदं । सर्व्वोपाय-कौशल्यपदं । ध्यान-विमोक्ष-समाधि-समापत्तिपदं । सर्व्व-धर्म्म-प्रवेशनपदं । नित्य-काल-देवताभिकाङ्क्षिपदं । ये च कुलपुत्रा नानास्थानेषु दीक्षन्ते । मोक्षार्थेषु नाना पटेषु दीक्षन्ते । तद्यथा इन्द्रपटं श्वेतपटं धुशषितपटं । दिवस-निरीक्षका महेश्वरेषु दीक्षन्ते । वैल्म-वेग-रुद्रेषु नग्नश्रवणेषु च । एषु स्थानेषु दीक्षन्ते । न तेषां मोक्षं संविद्यते । अनादि-गतिकानामपि नापि नाशो भवति । सर्व्वदेवगणाश्च ब्रह्म-विष्णु-महेश्वराः शक्रश्च देवाना मिन्द्र श्चन्द्रादित्यौ वायु-वरुणादयो यमश्च धर्म्मराजो चत्वारश्च महारा-जानः । ते नित्यकालं षडक्षरीं महाविद्या-राज्ञीं प्रार्थयन्तः ।

अथ सर्व्वणीवरणविष्कम्भी तमाह—कथं वयं षडक्षरीं महाविद्या-राज्ञीं लभेमहि । येन वयं क्षिप्र-त्रसा भवामः ?

धर्म्म भाणक स्तमुवाच—तद्यथापि नाम सर्व्वणीवरणविष्क-म्भिन् ! प्रज्ञापारमिताः निर्जाता सर्व्व-तथागताः । तत्प्रज्ञापार-मिता सर्व्व तथागतानाञ्च नेत्रे व्याख्यायते । सापि च षडक्षरीं महाविद्या-राज्ञीं प्रणमते कृतांजलिपुटा भवन्ती प्रागेव तथा-गता अर्हन्तः सम्यक्सम्बुद्धा बोधिसत्त्वगणाः । इदं कुलपुत्र ! तण्डुलवत्सारं महायानस्य किञ्चिदसौ बहु महायान सूत्रं गेयं व्याकरण गाथा दाना निदानेतिवृत्त जातक वैपुल्याद्भुत धर्म्मो-पदेशकः प्राप्यन्ते कुलपुत्र जपितमात्रेण शिवं मोक्षं, किम्बहुना अन्य-कुशल मिति । किं तु स-मध्यगतं सारमुप गृह्णन्ति शालिन स्तथा सार मित्यनुगृह्णन्ति, नीत्वा स्वकीये निवेशने

भाण्डानि परिपूर्णानि कृत्वा स्थापयित्वा दिवसानुरूपेण सूर्य्य-तापेन परिशोषयित्वा मुशल-प्रहारैर्विभेदयन्ति तत स्तुवर्षाणि परित्यजन्ति। किं सारमिति व्यवस्थितं? तण्डुलं सारमिति। एवमेवान्ये योगा तुष-सदृशाः सर्व्वयोगानां चेयं षड़क्षरी महाविद्या राज्ञी तण्डुलमिति भूता द्रष्टव्या। यस्याः कारणेन कुलपुत्र! बोधिसत्त्वाः श्रावयन्तो भ्रमन्ति॥ दान-पारमितार्थिनः, शील-पारमितार्थिनः, क्षान्ति-पारमितार्थिनः वीर्य्य-पारमितार्थिनः, ध्यान-पारमितार्थिनः, प्रज्ञा-पारमितार्थिनः। एक जापेन कुलपुत्र षट्पारमिताः परिपूरयति यस्य कस्यचिद्धस्त-स्पर्शनेनापि अवैवर्त्तिक-भूमिम्प्रतिलभन्ते। एव मेवास्याः षड़क्षरी महाविद्या राज्ञी, दुर्लभ मस्या नाम ग्रहणं। एकवार-नाम-ग्रहणेन सर्व्वे तथागता श्चीवर-पिण्ड-पात्र-शय्यासन-ग्लान-प्रत्यय-भैषज्य-परिष्कारैः सर्व्वो पस्थाने रुपस्थिता भवन्ति॥

अथ सर्व्वणीवरणविष्कम्भी धर्म्मभाणक मेतदवोचत्—दद्स्व मे षड़क्षरि-महाविद्या-राज्ञीं। अथ स धर्म्मभाणकः सञ्चिन्त्याचिन्त्य व्यवस्थिता ततो आकाशे छब्दो निश्चरतिस्म। दद्स्व आर्य्य षड़क्षरीं महाविद्या-राज्ञीं। अयम्बोधिसत्व भूतोऽनेक दुष्कराभि युक्तः। पुन स धर्म्मभाणकः सञ्चिन्तयति स्म कुतः शब्दो निश्चरतः। ततः स पुनरप्याकाशाच्छब्दो निश्चरितः। दद्स्वार्य्य! षड़क्षरीं महाविद्या-राज्ञीं अयं बोधिसत्वोऽनेक दुष्कराभियुक्तः।

अथ स धर्म्मभाणक आकाशं व्यवलोकयति स्म। यावत्पश्यति शरत्-काण्ड-गौरवर्णं जटा-मुकुटधरं सर्व्वज्ञ-शिरसिकृतं शुभ-



पद्महस्तं पद्मश्रियालङ्कृतं शरीरं, स तादृशं रूपं दृष्ट्वा सर्व्वणीवरण विष्कम्भिणं बोधिसत्व मेतदवोचत्। अनुज्ञातस्ते कुल-पुत्रावलोकितेश्वरेण बोधिसत्वेन षड़क्षरीं महाविद्या-राज्ञीं प्रदातुं, उद्गृह्णस्व त्वमिमां षड़क्षरीं महाविद्या-राज्ञीम्।

तेमस संभ्रमेण कृताञ्जलिपुटेन भूत्वा उद्गृहीतु मारब्धः॥

॥ * ॥ ० ॥ + ॥ ओं मणिपद्मे हूं ॥ × ॥ ० ॥ * ॥

इयञ्च समनन्तर-दत्तमात्रेण षड्विकारं पृथिवी प्रकम्पिता। इमे समाधयः सर्व्वणीवरण विष्कम्भीणः प्रतिलब्धाः॥ तद्यथापि नाम कुलपुत्र! शूक्ष्मजनो-नासमाधिः, मैत्री-करुणा-मुदितो नाम समाधिः, योगाचारो नाम समाधिः, मोक्ष-प्रवेश-व्यवस्थानो नाम समाधिः, सर्व्वालोककरो नाम समाधिः, व्यूहराजो नाम समाधिः, धर्म्मधरो नाम समाधिः। इमे समाधयः प्रतिलब्धाः उद्गृहीतमात्रेण सर्व्वणीवरणविष्कम्भिणा बोधिसत्वेन तस्योपाध्यायस्य दक्षिणोपनामयितु मारब्धा। चत्वारो द्वीपाः सप्तरत्न-परिपूर्णाः।

अथ सधर्म्मभाणक स्तस्यैत दवोचत्। एकस्याक्षरस्यापि न भवति दक्षिणा, प्रागेव षड़क्षरि-महाविद्यायाः न च गृह्णामि कुलपुत्र! त्वच्छकाशात्। त्वं च बोधिसत्वभूत आर्य्योऽनार्य्योऽसि मा वै नेयाश्च त्वं कुलपुत्र!

तेन तस्य शत-सहस्र-मूल्य-मुक्ताहार मुपनामितम्।

स कथयति—कुलपुत्र! मद्वचनेन शाक्यमुने स्तथागतस्यार्हतः सम्यक् संम्बुद्धस्योपनामयितव्यम्॥

अथ सर्व्वणीवरणविष्कम्भी तस्य धर्म्मभाणकस्य पादौ शिरसा वन्दित्वा प्रक्रान्तः, परिपूर्ण-लब्धलाभोमनोरथो येन जेतवन-

विहारस्तेनोपसङ्क्रान्तः। उपसङ्क्रम्य भगवतः पादौ शिरसाऽभिवन्द्यैकान्ते व्यवस्थितोऽभूत् ॥

## ॥ इति षड़क्षरि महाविद्या मण्डल वर्णनं षष्ठ-प्रकरणम् ॥

—:०:—

अथ भगवान् शाक्यमुनिस्तथागतोऽर्हत्सम्यक् सम्बुद्धस्तमेतदवोचत्-लब्धलाभस्त्वं कुलपुत्र ! ?

स आह—यथा भगवन् ! ज्ञानं सञ्जानीते। ततः सप्त-सप्ततिः सम्यक्सम्बुद्ध-कोट्यः सन्निपतिताः, तैश्चापि तथागतैरियं धारणी भाषितु मारब्धाः ॥

"नमः सप्तानां सम्यक्सम्बुद्ध कोटीनाम्"

॥ × ॥०॥ "ओंचले चुले चुन्दे स्वाहा" ॥०॥ × ॥

इयं सप्त-सप्तति-सम्यक्सम्बुद्ध-कोटिभि रुक्ता नाम धारणी ॥

ततो रोमविवरा दवतीर्य्य सूर्य्यप्रभो नाम रोमविवरस्तत्रानेकानि बोधिसत्व कोटि-नियुत-शत-सहस्राणि प्रतिवसन्ति। तस्मिन् सूर्य्यप्रभे रोमविवरे द्वादश-शतसहस्राणि कनकमयानां पर्वतानां प्रतिवसन्ति। तस्मिं पर्व्वते पर्व्वते द्वादश शृङ्ग शतानि, तेषां पर्व्वतानां पार्श्वानि पद्मरागोपचितानि पार्श्वे दिव्य-मणि-रत्न-खचितानि परम-शोभमानानुद्यानानि, परम शोभितानि विचित्राणि सुरमणीयानि दिव्यपुष्करिण्यन्यानि च, कूटागार-शतसहस्राणि, दिव्य-सुवर्ण-रत्न-मयाणि मुक्तापटुदामकलाप-प्रलम्बितानि, मुक्ताहार शतसहस्राणि प्रलम्बितानि, तेषां कूटागाराणाम्मध्ये सारदो नाम चिन्तामणि-रत्नं, यत्तेषां



बोधिसत्वानां सर्व्वोपकरणै रुपस्थानं करोति। तदा ते बोधिसत्वा स्तेषां कूटागारेषु प्रविशन्ति। प्रविष्टा च षड़क्षरी महाविद्या मनुस्मरन्ति। तत्रावलोकितेश्वरं पश्यन्ति। दृष्ट्वा च तस्य चित्त-प्रसादं जनयन्ति। जनयित्वा च ते बोधिसत्वा स्तेभ्यः कूटागारेभ्यो निष्क्रामन्ति। निष्क्रम्य केचिच्चंक्रमेषु चङ्क्रमन्ति। केचिन्मणिरत्नमयेषूद्यानेषु, केचित् पुष्करिणीषु गच्छन्ति, केचित् पद्मरागमयेषु पर्व्वतेषु गच्छन्ति। गत्वा च पर्य्यङ्कमाभुज्य ऋजुकायं प्रणिधायाभिमुखः स्मृति मुपस्थाप्य इदृशास्ते कुलपुत्र! बोधिसत्वा स्तस्मिन् रोम-विवरे प्रतिवसन्ति। ततः कुलपुत्र ! रोमविवरादवतीर्य्य इन्द्रराजो नाम रोमविवरस्तत्रानेकान्य वैवर्त्तिक बोधिसत्व कोटि नियुत शत सहस्राणि प्रतिवसन्ति। तस्मिन्निन्द्रराज-रोमविवरेऽशीति सहस्राणि पर्व्वता नाम भूवन् दिव्य सुवर्ण रत्नमयानि। तत्तेषां पर्व्वता नाम मध्या पद्मावभासो नाम चिन्तामणि रत्नं। यदा यदा ते बोधिसत्वाश्चिन्तयन्ति तदा तदा तेषां अभिप्रायोनु सिध्यति। अथ ते बोधिसत्वास्तेषु पर्व्वत राजेषु विहरन्ति। न च तेषां संसारिकं दुःखं विद्यते न च ते सांसारिकैः क्लेशैर्लिप्यन्ते। सर्व्व-कालन्निर्व्वाण चिन्ता व्यवस्थिता। न च तेषा मन्या चिन्ता शरीरे सम्बिद्यते। ततः कुलपुत्र रोमविवरा दवतीर्य्य महौषधो नाम रोमविवरः। तत्रानेकानि प्रथम चित्तोत्पादिका बोधिसत्व कोटि नियुत शत सहस्राणि प्रतिवसन्ति। तस्मिन् कुलपुत्र रोमविवरे नव नवति सहस्राणि पर्व्वतानां केचिव्वज्रमयाः केचिद्रूप्यमयाः केचित् सुवर्णमयाः केचिदिन्द्रनीलमयाः केचित्पद्मरागमयाः केचिन्मरकतमयाः केचित्स्फटिकमयाः केचिद्रजतमयाः इदृ-

शास्ते पर्व्वतराजनः। एकैकस्मिन् पर्व्वते ऽशीति शृङ्गसहस्राणि विविधरत्नखचितानि परमशोभनीयानि विविधचित्राणि रमणीयानि। तेषु शृङ्गेषु गन्धर्व्वाः प्रतिवसन्ति सततकालं रोमविवरान्निनादितं तूर्य्यं धारयन्ति। ये ते प्रथम चित्तोत्पादिका वोधिसत्वास्ते शून्यतानिमित्तं चिन्तयन्ति। अहो दुःखं जरादुःखं मरणदुःखं इष्ट प्रिय संप्रयोग वियोगदुःखं अवीच्युपपन्नानां दुःखं प्रेत नगरोपपन्नानां सत्वानां दुःखं इदं काये संवेग मनु विचिन्त्य तदा ते पर्य्यङ्क माभुज्य ऋजुकायम्प्रणिधाय प्रतिमुखां स्मृति मुपस्थाप्य तेषु पर्व्वतराजेषु विहरन्ति। ततः कुलपुत्र रोमविवरा दवतीर्य्य चित्तराजो नाम रोमविवर स्तत्रानेकानि प्रत्येक बुद्ध कोटि नियुत शत सहस्राणि प्रतिवसन्ति। ये ज्वलन तपन विद्योतन वर्षण प्रातिहार्य्याणि कुर्व्वन्ति। तस्मिन् रोमविवरे शत सहस्राणि पर्व्वतानां ते सर्व्वे पर्व्वतराजः सप्तरत्न मयास्तेषु पर्व्वतराजेषु विविधानि कल्पवृक्षाणि सौवर्णदण्डानि रूप्यपत्राण्यनेका रत्नखचितानि विविधालङ्कार प्रलम्बितानि मौली कुण्डल स्रग्दाम प्रलम्बितानि केयूर हारा र्द्धहार प्रलम्बितानि काशिक वस्त्र प्रलम्बितानि। सौवर्ण रूप्यघण्टारुण रुणायमानानि तादृशैः कल्पवृक्षैः पर्वतराजेषु प्रत्येकं वुद्धा विहरन्ति। अनेकानि सूत्रगेयं व्याकरण गाथो दानेतिवृत्तक जातक वैपुल्याद्भुत धर्म्मोपदेशं परस्परमीदृशं साङ्कथ्यं कुर्व्वन्ति। तदा सर्व्वणीवरणविष्कम्भी ततो रोमविवरा दवतीर्य्य सर्व्व पश्चिमीयं रोम विवरः ध्वजाग्रो नाम रोमविवरः। सरोम विवरो ऽशीति योजन सहस्राणि तस्मिन रोम विवरे ऽशीति पर्वतसहस्राण्य भवन्



विविध रत्नपरि खचित विचित्राणि तेषु पर्वत राजेषु अनेकाः कल्पवृक्षा अनेका चन्दन वृक्षाः शतसहस्राः। अगरु वृक्ष शत सहस्राः। तस्मिन् रोम विवरे वज्रमयी भूमिः। तस्मिन् रोमविवरे नव नवति कूटागार शत सहस्राणि दिव्य सौवर्णमयानि मुक्ताहार पटदामकलाप प्रलम्बितानि। घण्टा-माला प्रलम्बितानि। चन्द्रकान्ति रत्नावभासितानि तत्तेषु कूटागारेषु तथागत विग्रहा निषण्णा स्ते जाम्बुद्वीपकाना मनुष्याणाञ्च धर्म्मन्देशयन्ति। यदुतषट्पारमिता निर्द्देशं निर्द्दिशन्ति। दानपारमिता निर्द्देशं निर्द्दिशन्ति। शील पारमिता निर्द्देशं निर्द्दिशन्ति। क्षान्तिपारमिता निर्द्देशं निर्द्दिशन्ति। वीर्य्यपारमिता निर्द्देशं निर्द्दिशन्ति। ध्यान पारमिता निर्द्देशं निर्द्दिशन्ति। प्रज्ञापारमिता निर्द्देशं निर्द्दिशन्ति। एवं विविधान्धर्म्मदेशनां कृत्वा जाम्बुद्वीपकाना मनुष्याणां कालेन कालं धर्म्मन्देशयन्ति। एवं ते कुलपुत्रा वलोकितेश्वरस्य वोधिसत्वस्य महासत्वस्य रोमविवराणि यावत् पश्यन्ति तस्मिन्नेव जेतवन विहारे देवनागयक्षगन्धर्व्वासुरगरुड़किन्नरमहोरगमनुष्या मनुष्यः। महेश्वर नारायण पूर्व्वंगमानि देवपुत्राणि सन्निपतितानि। अनेकानि वोधिसत्व कोटि नियुत शत सहस्राणि। सन्निपतितानि ॥

अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतदवोचत्। किम्भगवन्! यानि रोम विवराणि सम्बिदान्ते वा ॥

भगवानाह—ततः कुलपुत्ररोमविवरादतिक्रम्य अवलोकितेश्वरस्य दक्षिण्पादां गुष्ठं यत्र ते चत्वारो महासमुद्राः परिभ्रमन्ति न च जानन्त्य वगाहयन्ति यदा दक्षिण पादां गुष्ठादुदकनिःक्रा-

मति। तदा वड़वामुखे पतन्ति। तदा भस्मराशि मनु- [illegible] न्ति। एवमेव कुलपुत्रा वलोकितेश्वरस्य वोधिसत्वस्या- [illegible]नां संविद्यते। अथ सर्व्वणीवरणविष्कम्भी भगवन्त [illegible]तद्वोचत्। तदपि भगवद् रोम विवरं सम्विद्यते॥

भगवानाह। तदपि कुलपुत्र न सम्विद्यते। अथ सर्व्व- णीवरण विष्कम्भी भगवन्तमेतदवोचत्। नागच्छति भगवन्न वलोकितेश्वरः॥

भगवानाह—आगच्छति कुलपुत्रावलोकितेश्वरः। अस्मि- न्नेव जेतवन महाविहारे मम दर्शनाय वन्दनाय पर्य्युपास- नाय महेश्वरस्य देवपुत्रस्य सहाया लोकधातौ व्याकरण मुद्दे- शायच॥

अथावलोकितेश्वरेण वोधिसत्वेन महासत्वेन रश्मयो उत्- सृष्टा नीलपीतलोहितावदातमाञ्जिष्ठ स्फटिक रजत वर्णास्ते चरश्मयो जेतवन मागच्छन्ति। आगत्य भगवन्तन्त्रिः प्रदक्षिणी कृत्य पुनरेव जेतवना द्विहारान्निष्क्रम्य अवीचिम्महा नरकं गच्छन्ति तत्र गत्वा अवीचि महानरकं शीतिभाव मुपनयन्ति। अथ सर्व्वणिवरण विष्कम्भी भगवन्त मेतदवोचत्। कुतो भगवन् स्मय आगच्छन्ति कुत्र गच्छन्ति॥

भगवानाह—एवं कुलपुत्रा वलो कितेश्वरेण नानाविधार- श्मय उत्सृष्टा स्तेचास्मिन् जेतवने विहार मागच्छन्ति। आगतश्च मान्त्रिः प्रदक्षणीकृतया वीचिम्महा नरकं गच्छन्ति। गत्वा चाविचि महानरकं शीतिभावं कुर्व्वन्ति। तस्मिञ्जेतवने विहा- रेशुभ निमित्तानि प्रादुर्भूतानि। दिव्यानि चम्पक वृक्षाणि प्रादुर्भूतानि। दिव्याः पुष्करिण्यः प्रादुर्भूताः तत्र जेतवन



আর্য্য অবলোকিতেশ্বরের নাম স্মরণ করে এবং তাহাতেই তাহাদের কোন বস্তুর অপ্রতুল থাকে না।

সর্ব্বণীবরণবিষ্কম্ভী ভগবান্‌কে বলিলেন—হে ভগবন্! আমি সেই রোমবিবর সকল দর্শন করিতে বাঞ্ছা করি অত- এব আমি তথায় তথায় গমন করিব। ভগবান্ বলিলেন— হে কুলপুত্র! সেই রোমবিবর সকল অগ্রাহ্য ও অসংস্পৃশ্য, যেরূপ আকাশ গ্রহণ করিতে বা স্পর্শেন্দ্রিয়ে প্রত্যক্ষ করিতে পারা যায় না, তৎ সমস্তও সেইরূপ। মহাসত্ব বোধিসত্ব সমন্তভদ্র সেই রোমবিবর গুলির দর্শনার্থ দ্বাদশ বর্ষ পরিভ্রমণ করিয়াও কৃতকার্য্য হন নাই, তাঁহার এক এক রোমবিবরে যে শত২ বুদ্ধেরা আছেন তাঁহারাও তৎ সমস্ত দর্শনে সক্ষম হন নাই; ইতি পূর্ব্বে অনেকানেক বোধিসত্ব ঐরূপ দর্শনার্থ চেষ্টা করিয়া বিফল-যত্ন হইয়াছেন।

অনন্তর সর্ব্বণীবরণবিষ্কম্ভী ভগবান্‌কে বলিলেন— হে ভগবন্! যদি মহাসত্ব বোধিসত্ব সমন্তভদ্রও দ্বাদশ বর্ষ পরিভ্রমণ করিয়া সেই সমস্ত রোমবিবরের সীমা পরি দর্শনে সক্ষম হন নাই এবং ইঁহারা রোমবিবরে স্থিত শত২ বুদ্ধে- রাও সেই সমস্ত রোমবিবর পরিদর্শনে সমর্থ হন নাই—তবে আমি কিরূপে দর্শন করিতে পারি! ভগবান্ বলিলেন— কুলপুত্র! তাঁহার রোমবিবর সমস্ত পরিদর্শনার্থ বহুদিন পথ অন্বেষণ করিয়াছি কিন্তু কৃতকার্য্য হইতে পারি নাই। তিনি নিরঞ্জন, অরূপ, সর্ব্বব্যাপী, তাঁহার লক্ষ বাহু, কোটি লক্ষ নেত্র, তিনি একাদশ শীর্ষ, সর্ব্বরূপ, মহাযোগা, নির্ব্বাণের ভূমি স্বরূপ, সুচেতন, মহাপ্রাজ্ঞ, ভব সংসারের এক মাত্র

ओं । अबाधाच्च । ओं ॥२९ ॥

ओं । अपि स्मर्य्यते । ओं ॥ ३० ॥

ओं । शब्दाश्चातोऽकाम चारे । ओं ॥ ३१ ॥

ओं । विदित त्वाच्चा श्रम कर्म्मापि । ओं ॥ ३२ ॥

ओं । सहकारित्वे न च । ओं ॥ ३३ ॥

ओं । सर्व्वथा पितु तत्त्वोभय लिङ्गात् । ओं ॥ ३४ ॥

---

अन्याय्याचरणाभावेनहि ज्ञानस्या बाधनं । अतो विद्वान पिन्याय्यं वर्त्ततीत्कर्ष-सिद्धय इति च बृह्म तर्के ॥ २९ ॥

अतीतानागत ज्ञानी त्रैलोक्योद्धरण क्षमः । एतादृशोपि नाचारं श्रौतं स्मार्त्तं विसर्ज्जयेदिति श्रीहरि वंशेषु ॥ ३० ॥

सर्वतदेवं मन्वान एवं पश्यन्न कामं चरति चरेन्न काम भक्ष्यीत न काममनुवर्त्तेतेति कौशिकश्रुतौ । अत इत्यल्प फलकत्वं सूचयति न निषिद्धानिवर्त्तेत पूर्ण ज्ञान फलेच्छयेति पाद्मे ॥ ३१ ॥

न केवलं निषिद्धा करणेन पूर्य्यते कर्त्तव्यश्च वर्णाश्रम विहितं कर्म्म ॥ पश्यन्न पीममात्मानं कुर्य्यात् कर्म्म विचारयन् । यदात्मानं सुनियत मानन्दोत्कर्षमाप्नुया दिति कौषारव श्रुतौ विहितत्वाच्च । अपि शब्दो वर्णधर्म्मसमुच्चयार्थः ॥ ३२ ॥

यथा राज्ञः सहकार्य्ये मन्त्री तथा कृतेच चितिपः कार्य्य मृच्छेत् । एवं ज्ञानं कर्म्म विनापि कार्य्यं सहाय भूतं न विचारः कुतश्चिदिति कमठ श्रुतौ सहकारित्वोक्तेश्च । ज्ञानान्मोक्षो भवत्येव सर्व्व कार्य्य कृतोपि तु । आनन्दोह्रसते कायाच्छुभं कृत्वा विवर्द्धते इति च बृह्माण्डे । सर्व्व दुःख निवृत्तिस्तु ज्ञानिनो निश्चितैवहि । उपासया कर्म्मभिश्च भक्त्याचानन्द चितवेति बृहत्तन्त्रे । धर्म्मस्वरूप चित्तत्वाद् योयो देव मनोगतः । स एव धर्म्मो विज्ञेयो न क्ष्यते लोक संमिता इति च पाद्मे ॥ ३३ ॥

सर्व्व प्रकारेणोत्साहेपि ये ज्ञान योग्यास्त एव ज्ञानं प्राप्नुवन्ति नान्ये । य आत्मा ऽपहत पाप्मा विजरो विमृत्यु विंशोको विजिघित्सा पिपासः सत्य कामः सत्य संकल्पः



विहारे दिव्य सौवर्ण निर्भासा दृश्यते । ईदृशो जेतवन विहारो दृश्यते । अथावलोकितेश्वरः सुखावती लोकधातौ निष्क्रम्य येन जेतवनविहारस्तेन सम्प्रस्थितः अनुपूर्व्वेण जेतवन विहारं संप्राप्तः । अथ तस्मिञ्जेतवनविहारे प्रविष्टो भगवतः पादौ शिरसाभिवन्द्य एकान्ते स्थितः तदा कलविंकरुतस्वराभिनिर्घोषेण भगवाना रोचयति । आन्तस्त्वं कुलपुत्र क्लान्तस्ते सत्व परीपाकः । अथावलोकितेश्वरो बोधिसत्वो महासत्वो भगवन्त मेतदवोचत्—यथाज्ञप्तो भगवता एवं च मया कर्म्मभूमि र्निष्पादिता । अथ भगवान् साधुकार मदात्—साधु साधु कुलपुत्र! यस्त्वं ईदृशा कर्म्मभूमि र्निष्पादिता । अथावलोकितेश्वरो भगवन्तं पद्मानुप्रपनामयति इमानि ते भगवन्नमिताभेन तथागतेन प्रहितानि पृच्छत्यल्पा बाधता ग्लानांतकता च लघुस्थानताञ्च सुखस्पर्शविहारताञ्च, ततो भगवता गृहीत्वा वामपार्श्वे स्थापितानि । अथ महेश्वरो देवपुत्रो येन भगवाँस्तेनोपसङ्क्रान्तः, उपसङ्क्रम्य भगवतः पादौ शिरसाऽभिवन्द्य भगवन्त मेतदवोचत्—लभेयामु भगवन् व्याकरणनिर्द्देशस्य समुद्देशं ॥

भगवानाह—गच्छ कुलपुत्रावलोकितेश्वरो बोधिसत्वो महासत्वस्ते (तुभ्यं) व्याकरणं दास्यति । अथ महेश्वरो देवपुत्रा वलोकितेश्वरस्य पादयो र्निपत्य स्तोत्रविशेषं कर्त्तुमारब्धः ।

नमो स्त्ववलोकितेश्वराय महेश्वराय पद्मधराय पद्मासनाय पद्मप्रियाय शुभपद्महस्ताय पद्मश्रिये परिहृताय जगदाह्लादनकराय पृथिवी वरलोचनकराय प्रह्लादकराय ॥

एव महेश्वरो देवपुत्रो गत्वा वलोकितेश्वरस्य स्तोत्रविशेषं

कृत्वा तूष्णींभावेन व्यवस्थिता। अथ ऽवलोकितेश्वर स्तमेतद्वोचत्—किं कारणं त्वं कुलपुत्रस्तूष्णींभावेन व्यवस्थितः! अथ महेश्वरो देवपुत्र स्तमेतद्वोचत्। ददस्व मे व्याकरण मनुत्तराया सम्यक् सम्बोधौ। अवलोकितेश्वरस्त मेतदवोचत्। भविष्यसि त्वं कुलपुत्र विवृतायां लोकधातौ भस्मेश्वरो नाम तथागतोर्हं सम्यक् सम्बुद्धो विद्याचरण सम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता-देवानाञ्च मनुष्याणाञ्च बुद्धो भगवान्। अथ सा उमादेव्युपसंक्रम्या वलोकितेश्वरस्य पादौ शिरसा वन्दित्वा अवलोकितेश्वरस्य स्तोत्राभिधानं कर्तुमारब्धा॥

नमस्त्ववलोकितेश्वराय महेश्वराय प्राणन्ददाय पृथिवी वरलोचनकराय शुभपद्मश्रिये परिवृताय निर्व्वाणभूमिसम्प्रस्थिताय सुचेतनकराय धर्म्मधराय॥

एवं सोमादेवी स्तोत्राभिधानं कृत्वा वलोकितेश्वरस्य प्रव्याहारं कर्तुमारब्धा॥

परिमोचय मे स्त्रीभावा ज्जुगुप्सनीयात् कलिमलप रिपूर्ण गर्भावासदुःखात् सततपरिग्रहसंगृहीतात् परिमोचय मां। अथावलोकितेश्वर स्तामेतद्वोचत्—भविष्यसि त्वं भगिनी हिमवतः पर्व्वतराजस्य दक्षिणे पार्श्वे तव लोकधातुर्भविष्यति। उमेश्वरो नाम तथागतो र्हंत्सम्यक् सम्बुद्धो विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्य सारथिः शास्ता देवानां च मनुष्याणाञ्च बुद्धो भगवान्। अथ सा उमादेवी व्याकरण मनुप्राप्ता॥

भगवानाह—पश्य सर्व्वणीवरणविष्कम्भीन् व्याकृता उमा-



देवी अवलोकितेश्वरेण बोधिसत्त्वेन महासत्त्वेन सर्व्वेतेऽनुत्तरायां सम्यक् सम्बोधौ॥

अयं कुलपुत्र महेश्वर निर्व्वृतो नाम ख्यात इति॥

अथ सर्व्वणीवरणविष्कम्भी भगवन्त मेतदवोचत्—

आगतो भगवन् वलोकितेश्वरो यथास्वभूतेन चक्षुरनुप्राप्तमेव भगवन्नवलोकितेश्वर मनुप्राप्तः॥

अद्य मे सफलं जन्म अद्य मे आशा परिपूर्णा, अद्य मे परिशोधित बोधिमार्गः सचेतन सधर्म्मकायन्निर्व्वाणोपदर्शकं॥

अथ सर्व्वणीवरणविष्कम्भी पुनरेव भगवन्त मेतदवोचत्। अद्यास्माकं भगवन्देशय त्व मवलोकितेश्वरस्य गुणविशेषं॥

भगवानाह—तद्यथापिनाम सर्व्वणीवरणविष्कम्भिन् चक्रवाड महचवाडौ पर्व्वतराजनौ। मुचिलिन्द महामुचिलिन्दो पर्व्वतराजानौ। काल महाकालौ पर्व्वतराजानौ। संसृष्ट महासंसृष्टौ पर्व्वतराजानौ। प्रलम्बोदरः पर्वतराजा अनादर्शकः पर्व्वतराजा। कृत्स्नागतः पर्व्वतराजा। जालिनी मुखः पर्व्वतराजा। शतशृङ्गः पर्व्वतराजा। भवनश्च पर्व्वतराजा महामणिरत्नः पर्व्वतराजा। सुदर्शनश्च पर्व्वतराजा। अकालदर्शनश्च पर्व्वत राजा। एतेषु पर्व्वतराजेष्वेकैकं लोकधातुषु शक्यते मया पर्व्वतराजानां पलानि वा पलशतानि पलसहस्राणि वा पलकोटी नियुत शत सहस्राणि वा संख्यामपि कलामपि गणनामपि शक्यते मया कुलपुत्र गणयितुं। नतु कुलपुत्रावलोकितेश्वरस्य शक्यते पुण्यसम्भारं गणयितुं। तद्यथापि नाम कुलपुत्र शक्यते मया परमाणुरजसां प्रमाणमुद्गृहीतुं। न तु कुलपुत्रावलोकितेश्वरस्य शक्यते पुण्यसम्भारं गणयितुं। तद्यापि

नाम कुलपुत्र शक्यते मया महासमुद्रस्यै कैकंविन्दु गणयितुं । न तु कुलपुत्रावलोकितेश्वरस्य शक्यते मया पुण्य सम्भारं गणयितुं । तद्यथापि नाम कुलपुत्र शक्यते मया-शीर्षवनस्यैकैकानि पत्राणि गणयितुं । न तु कुलपत्रावलोकितेश्वरस्य शक्यते पुण्यसम्भारं गणयितुं ॥

तद्यथापि नाम कुलपुत्र सुमेरुः पर्व्वतराजो भूर्ज्यराशि र्भवेत् । महासमुद्र मेरण्डु मण्डलम्भवेत् । चतुर्द्वीप निवासिनः स्त्री पुरुष दारक दारिकादयः सर्व्वे ते लेखका भवेयुः स च सुमेरु पर्व्वत राजोऽनन्तो लिखितो भवेत् । शक्यते मयै कैकाक्षरं गणयितुं । नत्ववलोकितेश्वरस्य शक्यते पुण्यसम्भारं गणयितुं । तद्यथापि नाम सर्व्वणीवरणविष्कम्भिन् द्वादश गङ्गानदी वालुकोपम स्तथागता अर्हन्तः सम्यक् सम्बुद्धाश्चीवर पिण्डपात्र शयनासन ग्लान प्रत्यय भैषज्य परिष्कारैः सर्व्वोपकरणै स्समुपस्थिता भवेयुः । यश्च तेषां तथागताना मुपस्थाने पुण्यस्कन्धः । ततः कुलपुत्रावलोकितेश्वरस्यै कवालाग्रे पुण्यस्कन्धः । तद्यथापि नाम सर्व्वणीवरणविष्कम्भि न्नवलोकितेश्वरः । अनेकैः समाधिशतैः समन्वागतः तद्यथा—प्रभञ्जनो नाम समाधिः । विभूषणकाला नाम समाधिः । अभूषणकरी नाम समाधिः । विद्युल्लोचनो नाम समाधिः । क्षपणो नाम समाधिः । महामनस्वी नाम समाधिः । आकारकरो नाम समाधिः । वज्रमाला नाम समाधिः । वरदो नाम समाधिः । शत वीर्यो नाम समाधिः । अन्वव्यूहानाम समाधिः । प्रतिहानकूटो नाम समाधिः । राजेन्द्रो नाम समाधिः । वज्रप्राकारो नाम समाधिः । वज्रमुखो नाम समाधिः । सदा वरदायको नाम समाधिः । इन्द्रिय परिमोचनो नाम स-



माधिः । द्वेषपरिमोचनो नाम समाधिः । चन्द्रवर लोचनो नाम समाधिः । दिवाकर वरलोचनो नाम समाधिः । धर्म्माभिमुखो नाम समाधिः । वज्र कुक्षिर्नाम समाधिः । सुदर्शको नाम समाधिः । निर्व्वाणकरो नाम समाधिः । अनन्तरश्मिनिष्पादनकरो नाम समाधिः । योगकरो नाम समाधिः । विकिरणो नाम समाधिः । जम्बुद्वीपवरलोचनो नाम समाधिः । वृद्धक्षत्रवर लोचनो नाम समाधिः । मैत्रयाभिमुखो नाम समाधिः । प्रज्ञाप्रतिभासितो नाम समाधिः । सुदन्तो नाम समाधिः । अक्षराक्षरो नाम समाधिः । अवीचि संशोषणो नाम समाधिः । सागर गम्भीरो नाम समाधिः । शतपरिवारो नाम समाधिः । मार्ग सन्दर्शनो नाम समाधिः । एभिः कुलपुत्रावलोकितेश्वरः समन्वागत स्तद्यथापि नाम सर्व्वणीवरणविष्कम्भिन् भूतपूर्व्वं कुलपुत्र क्रकुच्छन्दो नाम तथागतोऽर्हन् सम्यक् सम्बुद्धो लोक उदपादि विद्याचरण सम्पन्नः सुगतो लोक विदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणाञ्च बुद्धो भगवन् तेन कालेन तेन समयेनाहं दानसूरो नाम बोधिसत्वो भूवं । तदा एतस्य तथागतस्य पुनः स्थित्वा ईदृश मवलोकितेश्वर समन्तभद्रयोः समाधिविग्रहो मया दृष्टः भद्रादिभिश्चान्यै र्बोधिसत्वै र्म्महासत्वैः समाधिविग्रहो दृष्टः यदा समन्तभद्रो बोधिसत्वो वज्रोद्गतो नाम समाधिः समापेदे । तदावलोकितेश्वरो बोधिसत्वो महासत्वो विविणमाधि समाधि समापेदे । यदा समन्तभद्र श्चन्द्रवरलोचनं नाम समाधिं समापेदे । तदावलोकितेश्वरः सूर्य्यवर लोचनं नाम समाधिं समापेदे । यदा समन्तभद्रो विच्छुरित

नाम समाधिं समापेदे। तदावलोकितेश्वरो गगनगञ्जो नाम समाधिं समापेदे। यदा समन्तभद्र आकारकरन्नाम समाधिं समापेदे। तदावलोकितेश्वर इन्द्रमति नाम समाधिं समापेदे। यदा समन्तभद्रराज नाम समाधिं समापेदे। तदा-अवलोकितेश्वरः सागर गम्भीर नाम समाधिं समापेदे। यदा-समन्तभद्र सिंहविष्कम्भितन्नाम समाधिं समापेदे। तदाव-लोकितेश्वरः सिंहविक्रीड़ित नाम समाधिं समापेदे। यदा समन्तभद्रो वरदायक नाम समाधिं समापेदे। तदावलो-कितेश्वर अवीचि संशोषण नाम समाधिं समापेदे। यदा समन्त भद्रः सर्व्वरोमविवराण्युद्घाटयति। यदावलोकितेश्वरः सर्व्व रोम विवराण्यपावृणोति। तदा समन्तभद्र स्तमेतदवोचत्। साधु साध्ववलोकितेश्वर यस्त्वमीदृशं प्रतिभानवान्। अथ क्रकुच्छन्दस्तथागत स्तमेतदवोचत् अल्पं त्वया कुलपुत्रावलोकिते-श्वरस्य प्रतिमानं दृष्टं। यादृश मवलोकितेश्वरस्य प्रतिभानं तादृशं तथागतानान्न संविद्यते। ईदृशम्मया कुलपुत्र क्रकु-च्छन्दस्य तथागतस्य सकाशाच्छ्रुतं॥

अथ सर्व्वणीवरणविष्कम्भी भगवन्तमेतदवोचत्॥ देश-यतु मे भगवन्! कारण्डव्यूह महायान सूत्ररत्नराजं येन वयं धर्म्मरसेनापूर्य्यमाणः संतृप्ता भवेमः॥

भगवानाह—ये कुलपुत्र! कारण्डव्यूहस्य महायान सूत्ररत्न राजस्य नामं श्रोष्यन्ति। तेषां पूर्व्वकानि कर्म्मावरणानि न सम्बिद्यन्ते। ये परदार गमन प्रशक्ता औरभ्रिक कर्म्मोद्युक्ताः ये मातापितृघातका अर्हंघात स्तूप भेदका स्तथागतस्यान्तिके दुष्टचित्त रुधिरोत्पादकाः। ईदृशानां पापरतानां सत्वानां तदपि



कारण्डव्यूहो महायान सूत्ररत्नराजः सर्व्वपापपरि मोचनं। कुरुते। अथ सर्व्वणीवरणविष्कम्भी भगवन्तमेतदवोचत्। कथं जानाम्यहं भगवन्! कारण्डव्यूह महायान सूत्ररत्न राजं सर्व्व-पापपरि मोचनं कुरुते॥

भगवानाह—अस्ति कुलपुत्र सुमेरोः पर्व्वतराजस्य दक्षिणपार्श्वे सप्तभिः सम्यक् सम्बुद्धै र्मलनिर्म्मलौ तीर्थौ परिकल्पितौ एतौ हि मया विकल्पितौ यथा पाण्डुल वस्त्रं नील मनुगच्छन्ति। स पापराशिरिव द्रष्टव्यः। एवमेव कुलपुत्र इदं कारण्डव्यूहं महायान सूत्ररत्नराजं सर्व्वपापानि दहति। सुशुक्लभावं कुरुते॥

तद्यथापि नाम सर्व्वणीवरणविष्कम्भिन् वर्षाकाल समये सर्व्वाणि तृण गुल्मौषधिवनस्पतयः सर्वे नीलाभिभवन्ति। अथ शतमुखो नाम नागराज-भवनादवतीर्य्य सर्व्वास्ता तृणगुल्मौ-षधि वनस्पती र्दहति। एव मेवायं कुलपुत्र कारण्डव्यूह महायान सूत्ररत्न राजं सर्व्वपापानि दहति शुक्लभावं कुरुते। सुखितास्ते सत्वा भविष्यन्ति। य इमं कारण्डव्यूह महायान सूत्रं रत्न राजं श्रोष्यन्ति। न ते कुलपुत्र पृथग्जना इति वक्तव्या अवैवर्त्तिका बोधिसत्वा इव द्रष्टव्याः। तेषाञ्च मरणकारण समये द्वादश तथागता उपसङ्क्रम्य आश्वासयन्ति मा भैषीः कुल-पुत्र त्वया कारण्डव्यूह महायान सूत्ररत्नराजं श्रुतं। न त्वया पुनरेव संसारं संसरितव्यं। न पुनरपि तेषां जाति जरामरणं भविष्यति। तत इष्ट प्रिय विप्रयोगो प्रिय संप्रयोगो न भवि-ष्यति। गमिष्यसि त्वं कुलपुत्र! सुखावति लोकधातु ममिता भस्य तथागतस्य सकाशाद्धर्म्म मनु श्रोष्यसि। एवं कुलपुत्र!

तेषां सत्वानां सुख मरणम्भविष्यति। अथावलोकितेश्वरो भगवतः पादौ शिरसाभिवन् प्रैकान्ते प्रकान्तः। अथ सर्व्वणीवरणविष्कम्भि स्तूष्णीं भावेन व्यवस्थितः। ते च देवा नागा यक्षा गन्धर्व्वा असुरा गरुड़ाः किन्नारा महोरगा मनुष्या मनुः प्रकान्ताः। यदा ते प्रक्रान्तास्तदा युष्मानानन्दो भगवन्त मेतदवोचत् देशय तु मे भगवानस्माकं शिक्षासम्बरं॥

भगवानाह—ये भिक्षव उपसम्पदाभाव मिच्छन्ति तैः प्रथम तरङ्गत्वा नानावासस्त्वावलोकयितव्यं। व्यवलोकयित्वा भिक्षुकमारचयितव्यं शुद्धातिभदन्त नाना वासं न च यत्र नाना वासेस्थीनि सम्बिद्यन्ते। उच्चार प्रस्रावेन सम्बिद्यते। परिशुद्धाति एवं इभदन्तनानावास मर्हति उपसंपदाभावो भिक्षूणां॥

भगवानाह—दुःशीलेन भिक्षुणा नोपसंपादयितव्यं। न च क्षमिर्दातव्या किंबहुना भिक्षवो दुःशीलेन भिक्षुणा नाना वासं न कर्त्तव्यं। प्रागेव क्षमिचतुर्थं। एते हि शासन दूषिका दुःशीलानां भिक्षूणां शीलवतां दक्षिणीयाणां मध्ये आवासो न दातव्यः। तेषां वहिर्विहारे आवासो दातव्यः। तथा संभालापो न दातव्यः। न च तेषां सांघिकीभूमि मर्हति। न च तेषां किञ्चिद्भिक्षुभावं सम्बिद्यते। अथ खल्वायुष्मानानन्दो भगवन्त मेतदवोचत्। कतमे काले भगवन्नीदृशा दक्षिणीया भविष्यन्ति॥

भगवानाह—तृतीये वर्ष शतगते मम परिनिर्वृतस्य तथागतस्य ईदृशा दक्षिणीया भविष्यन्ति। ये विहारे गृह संज्ञं धारयिष्यन्ति। ते दारक दारिका परिवृता भविष्यन्ति। ते



सांघिकं मञ्चपीठं वंशिकोपविम्बोपधानकं शयनासनं असत्परिभोगेन परिभोक्ष्यन्ते। ये च सांघिकोपचारे उच्चारं प्रस्रावं कुर्व्वन्ति। ते वाराणस्यां महानगर्य्यां मुच्चार-प्रस्रावे गूढ़मृत्तिकोदरे प्राणिनो जायन्ते। ये सांघिकं दन्तकाष्ठमसत्परिभोगेन परिभुञ्जन्ते। ते कूर्म्म मकर-मत्स्येषु जायन्ते। ये सांघिकं तिल-तण्डुल-कोद्रव-कुलत्थ-धान्यादीन् सत्परिभोगेन परिभुञ्जन्ते। ते प्रेतनगरेषूपपद्यन्ते। हीनेन्द्रिया दग्धस्थूणाकृतिभि रस्थिपत्रवदुच्छ्रितैः स्वकेशरोमप्रतिच्छन्नैः पर्व्वतोदरसन्निभैः सूचीच्छिद्रोपममुखैः काये ईदृशन्ते दुःखं प्रत्यनुभवन्ति। ये सांघिकस्यान्नपानादेरन्यायेन परिभोगं कुर्व्वन्ति। तेऽल्पश्रुतेषु कुलेषु जायन्ते। हीनेन्द्रियाश्च जायन्ते। खञ्ज-कुब्ज-काणवामनाश्च जायन्ते। परमुखयाचनकाश्च जायन्ते। तत स्तत्वारि व्याधिताश्च जायन्ते। पूयशोणितं काये वहन्ति। स्वकीयाङ्गे सङ्कुचितकाया उत्तिष्ठन्ति। तदा मांसपिण्डा भूमौ पतन्ति। अस्थीनि दृश्यन्ते। एवन्ते बहूनि वर्षशतानि कायिकं दुःखं प्रत्यनुभवन्ति। ये सांघिकीं भूमिमसत्परिभोगेन परिभुञ्जन्ते। ते द्वादश कल्पाणं रौरवे महानरके उपपद्यन्ते तेषाम् तस्मान्ययोगुडानि मुखे प्रिक्षम्यन्ते दह्यन्ते ओष्ठमपि दन्ता अपि विशीर्य्यन्ते। तालूनि स्फुटन्ति। दह्यन्ते कण्ठमपि ताल्वपि हृदयमप्यन्त्रान्यपि सर्व्वेण सर्व्वं दह्यन्ते अवशेषं गच्छन्ति। तदा भिक्षवः कर्म्मवायवो वान्ति येन ते मृताः पुरुषाः पुनरेव जीवन्ति। ततः पुनरपि यमपालैः पुरुषैः संरुह्यन्ते। ततः तेषां कर्म्मोपगानां कर्म्मवशानां महती जिह्वा प्रादुर्भवति। तत्र जिह्वायां परि-हल-शत-सहस्रं कृष्यन्ते। एवन्ते बहूनि वर्ष-

शतानि बहूनि वर्षसहस्राणि बहूनि वर्षशतसहस्राणि नारकं दुःखं प्रत्यनुभवन्ति । तत श्च्युत्वा अग्निघटे महानरके उपपद्यन्ते । तत स्ते यमपालपुरुषा गृहीत्वा च तस्य जिह्वायां सूचीशतसहस्रं विध्यन्ति । तदपि कर्म्मवशाज्जीवन्ति तत उत्क्षिप्याग्निखदा-मध्ये क्षिपन्ति तस्यामग्निखदाया उत्क्षिप्य महतीं वैतरणीं क्षिपन्ति तदपि कालं न कुर्व्वन्ति तदन्यनरकेषूपपद्यन्ते । एवं परिक्रमतान्तेषान्त्रयः कल्पाः परिक्षीयन्ते । तत श्च्युत्वा जम्बुद्वीपे जायन्ते दरिद्राः जात्यन्धाः तस्मात्ते छन्दिकानुसाराणि सांघिकानि वस्तूनि रक्षितव्यानि ।

ये भिक्षवः शिक्षा संवर समावृताश्च भवन्ति ते इमानि त्रीणि चीवराणि धारयितव्यानि। एकं चीवरं संघस्य विश्वासेन संघपरिभोगाय तथा, द्वितीयं चीवरं राज-कुल-द्वार-गमनाय च, तृतीयं चीवरं ग्राम-नगर-निगम-पल्ली-पत्तनेषु चेमानि त्रीणि चीवराणि भिक्षवो धारयितव्यानि । ये शीलवन्तो गुणवन्तः प्रज्ञावन्त स्तैर्भिक्षव इमानि शिक्षापदानि मया प्रज्ञप्तानि धारयितव्यानि । घस्मरपरिभोगेन भिक्षवो न परिभोक्तव्यं सांघिकं वस्तु अग्निघटोपमम् । सांघिकं वस्तु विषोपमं सांघिकं वस्तु वज्रोपमं । सांघिकं वस्तु भारोपमं । विषस्य प्रतीकारं कर्तुं शक्यते, न तु सांघिकस्य वस्तुनः प्रतीकारं कर्तुं शक्यते ।

अथायुष्मानानन्दो भगवन्त मेतदवोचत्—आश्चर्याणि भगवता शिक्षापदानि ये भिक्षवो धारयन्ति । ते प्रतिमोक्ष-संवर-संवृता भवन्ति विनयाभिमुखा भवन्ति । कौशाभि-



मुखा भवन्ति । शिक्षा-कुशला भवन्ति । तानि च भगवतः शिक्षापदानि भवन्ति ॥

आयुष्मानानन्दो भगवतः पादौ शिरसा वन्दित्वा प्रक्रान्तः ॥

अथ ते महाश्रावकाः स्वकं स्वकं बुद्धक्षेत्रं प्रक्रान्ताः । ते च देवा नागा यक्षाः गन्धर्वा असुरा गरुडाः किन्नरा महोरगा मनुष्याः सर्वे ते प्रक्रान्ताः ॥

## इति शिक्षा-संवरो नाम द्वादश-प्रकरणम् ।

---

इदमवोचद्भगवां स्तेच बोधिसत्त्वा सा च सर्वावती पर्षत्स देव-मानुषा-सुर-गन्धर्वश्च लोको भगवता भाषित मभ्यनन्दन्निति ॥

—:-०-:—

अयं कारण्डव्यूह-महायान-सूत्ररत्न-राजस्य धारणिव्यूहः महेश्वरः समाप्तः ।

—:-०-:—

## आर्य्य-कारण्डव्यूहो महायानसूत्ररत्नराजः समाप्तः ।

——:-०-:——

ये धर्म्मा हेतु-प्रभवा हेतुस्तेषां तथागतः ।
ह्यवदत्तेषाञ्च यो निरोध एवं वादी महाश्रमणः ॥

——०——

## ॥ समाप्तोऽयं ग्रन्थः ॥